ISSN – 2349-3100 Peer Reviewed

सप्तमोऽङ्कः Refereed Journal

अन्ताराष्ट्रियमूल्यांकितत्रैमासिकसन्दर्भितशोधपत्रिका

# वेदज्योतिष्मती

## Vedajyotishmati

**संरक्षकाः**

**प्रो. रामचन्द्रझाः, प्रो. रामदेवझाः,**

**प्रो. देवेन्द्रमिश्रः, प्रो. शिवाकान्तझाः**

**प्रधानसम्पादकः**

**प्रो. हंसधरझाः**

आचार्यः, ज्यौतिषविभागः, राष्ट्रियसंस्कृतसंस्थानम्

भोपालपरिसरः।

**सम्पादकः**

**डॉ. आशीषकुमारचौधरी**

असिस्टेंट-प्रोफेसर, ज्यौतिषविभागः,

क.जे.सोमैया संस्कृतविद्यापीठम्, मुम्बई।

**प्रकाशकः**




**संस्कृत-अनुसंधान-संस्थानम्, के. एम. टैंक लहेरियासरायः, दरभंगा**

## सम्पादकमण्डलम्

1 **प्रो.बोधकुमारझाः**
आचार्य, व्याकरण-विभाग,
क. जे. सोमैया-संस्कृतविद्यापीठ, मुम्बई ।

2 **प्रो. हंसधरझाः**
ज्योतिष विभाग ,आचार्य,
राष्ट्रिय संस्कृत संस्थान , भोपाल परिसर, भोपाल।

3 **प्रो. प्रमोदवर्धनकौण्डिल्यायनः,**
विभागाध्यक्ष, मीमांसा दर्शन विभाग नेपाल,
नेपाल संस्कृत विश्वविद्यालय, काठमाण्डु, नेपाल ।

4 **जूही जेनोजे**
आचार्या,दर्शन विभाग,
कोरिया विश्वविद्यालय, सीओल, कोरिया ।

5 **डॉ. प्रवेशसक्सेना**
पूर्व आचार्या,संस्कृत विभाग,
जाँकिर हुसैन महाविद्यालय
दिल्ली विश्वविद्यालय।

6 **डॉ. धनञ्जयमणित्रिपाठी**
आचार्य ,संस्कृत विभाग,
मोदी विश्वविद्यालय, राजस्थान ।

7 **डॉ. दिलीपकुमारझाः**
विभागाध्यक्ष-धर्मशास्त्र विभाग
कामेश्वर सिंह संस्कृत विश्वविद्यालय, दरभंगा ।

8 **डॉ. राजीवमिश्रः**
प्राचार्य, सन्तनागपाल संस्कृतमहाविद्यालय,
एवं शोध संस्थान, सम्पूर्णानन्दसंस्कृत
विश्वविद्यालय, नई दिल्ली।

9 **टेल्टो डेल्टेज**
आचार्य दर्शन एवं संस्कृति विभाग,
हेल्डमार्ग विश्वविद्यालय,हेल्डनवर्ग, जर्मनी।

10 **प्रो. विद्यानन्द झाः**
प्राचार्य,
भोपाल परिसर, भोपाल।

**पुनर्वीक्षणमण्डलम्**

1. **आचार्यरामदेव झाः**
पूर्व आचार्य ज्योतिष विभाग,
लालबहादुर शास्त्री, राष्ट्रिय संस्कृत विद्यापीठ, दिल्ली ।
2. **आचार्य नीलाम्बर चौधरी**
आचार्य रामभगत राजीवगाँधी महाविद्यालय दरभंगा।
3. **आचार्या प्रवेश सक्सेना**
आचार्या ,जाँकिर हुसैन महाविद्यालय
दिल्ली विश्वविद्यालय,दिल्ली।

**प्रबंधक संपादक**

1. **श्री पंकज ठाकुर**
2. **किरण मिश्रा** ल.ना. मि.वि दरभंगा।

**परापर्शदातृसंपादकः**

1. **डॉ. रंजय कुमार सिंह**
रा. सं. संस्थान, मुम्बई।

**सहसंपादिका**

1**डॉ गीता दूबे** ,रा. सं. संस्थान, मुम्बई।

**सम्पादकसहायकः**
**श्रीसत्यनारायणः**


**वर्षम्**- NOV 2015

@copy right – Sanskrit Anusandan Sansthan

Email – rsas.kothram@gmail.com, vjvv.rs@gmail.com
Ph No. 06272-224671, 09619269812, 07506137027

**मूल्य**-300/

पत्रिका में प्रकाशित लेखों से प्रकाशक का सहमत होना अनिवार्य नहीं है। विवाद का समाधान दरभंगा न्यायालय से ही स्वीकार्य है ।लेखों को परिवर्तित, स्वीकृत एवं अस्वीकृत करने का पूरा अधिकार प्रकाशक को होगा ।A Trilingual Educational Sanskrit Research Journal Published by the Sanskrit Anusandhan Sansthan, Darbhanga

**From letter no-671/2014-15 Place on Rashtriya Sanskrit Anusandhan Sansthan will kown as the Sanskrit Anusandhan Sansthan, Darbhanga**

ISSN – 2349-3100

# सम्पादकीयम्

"वेदोऽखिलो धर्ममूलम्" इति महामानवेन मनुना सम्पूर्णस्य धर्मस्य मूलत्वेन वेदा एवोपन्यस्ताः। अथवा "वेद्यन्ते ज्ञायन्ते, लभ्यन्ते वा धर्मादिपुरुषार्था एभिरिति वेदाः" इति वेदशब्दस्य विवेचनयाऽपि पूर्वोक्तं मनुमतमेव सम्पुष्टिं याति। अत एव न केवलमार्यवंशीयैर्भारतीयैरेव वेदाः समाद्रियन्ते, अपि तु अन्यधर्मावलम्बिभिर्विजातीयैर्विदेशीयैरपि वेदाः समादृताः सन्ति। वेदेषु मन्त्ररूपेण यत् सूत्रीकृतो ज्ञानराशिर्विद्यते तस्यैव विस्तारः स्मृतिषु पुराणेषु इतिहासादिग्रन्थेष्वपि वरीवर्ति। अतो नात्र सन्देहो यच्चत्वारो वेदा हि सनातनाः प्राचीनतमाश्च। इमे हि चत्वारो वेदाः, आयुर्वेदः, धनुर्वेदः, गान्धर्ववेदः, अर्थशास्त्रञ्चेत्यादय उपवेदाः, शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषञ्चेति वेदस्य षडङ्गानि, पुराणानि न्यायशास्त्रं मीमांसाशास्त्रं धर्मशास्त्रादीनि चैतानि वेदस्योपाङ्गानि, सर्वं खलु ज्ञानविज्ञानमयं, यद्धि संस्कृतभाषोपनिबद्धमस्ति। संस्कृविद्यायां मानवजीवनस्य सर्वेषामङ्गानामादर्शा विद्यन्ते। राजनीति-दण्डनीति-अर्थनीत्यादिसकलशास्त्राणां मौलिकतत्त्वानि संस्कृतविद्यायां विलसन्ति। संस्कृतविद्या शान्तिमयजीवनस्यैकमात्रं स्थानमस्ति। इयमेवास्माकमनुपमो निधिः। इयञ्चास्माकं सभ्यतायाः संस्कृतेश्च प्रतीकमस्ति। अस्य संरक्षणमस्माकं दायित्वमस्ति। नास्ति सन्देहावसरो यत् संस्कृतसाहित्यं भारतस्य गौरवम्। समस्तं देशं संस्कृतसाहित्यमिदं एकस्मिन् सूत्रे बध्नाति। अतः संस्कृतास्यास्य नहि केवलं रक्षणमेवास्माकं दायित्वमपि तु अस्य संवर्धनमप्या स्माकं कर्तव्यम्। तत्र तेषां संस्कृतविद्यानिष्ठज्ञानविज्ञानानां संरक्षणं संवर्धनं वा वेदोपनिषदादिग्रन्थमाध्यमेन तु भवत्येव, तदतिरिच्य शास्त्रीय-ग्रन्थ-पत्रिका-शोधपत्रिकादिमाध्यमेनापि भवतीति विदामतिरोहितमेव।

एवं संस्कृतविद्यासंरक्षण संवर्धने पत्रिकाया अपि नूनमेवास्ति महत्त्वपूर्णं स्थानमित्यत्र न सन्देहः। तत्र पत्रिकाजगति नैकाः सन्ति ज्ञानविज्ञानमयाः पत्रिका यत्र लोकहितभावनां समुद्वहन्ती त्रैमासिकीयं वेदज्योतिष्मती-शोधपत्रिका विगतवर्षादनवरतं प्रकाशितं भवतीति महान् सन्तोषः। तत्रापि सप्तमोऽयमङ्कः पूर्ववदेव व्याकरण-साहित्य-ज्योतिष-धर्मशास्त्र-शिक्षाशास्त्रादिवेदवेदाङ्गसम्बद्धैः विपश्चिदां शोधपूर्णलेखैः परिपूर्णः सन्नैषमोऽपि प्राकाश्यमेतीति महत्तोषकरम्। आशासेऽङ्कोऽयं सप्तमोऽपि सुधियां पाठकानामात्मतोषाय स्यादेवेति।

एवं सारस्वतकार्यस्यास्य साफल्यक्रमे प्राथम्येन साधुवादं वितरामि समुत्साहिने युवपण्डिताय सम्पादकाय चिरजीविने श्रीआशीषकुमारचौधरीमहोदयाय, यस्य सार्थकपरिश्रमेण पत्रिकाया अस्या सप्तमाङ्कोऽपि लोकार्पणोद्यतोऽस्ति। ततःपरं ते सर्वेऽपि परिसरीया विद्वांसः कर्मचारिणस्तदतिरिक्ताः सज्जनाश्चाभिनन्दनीयाः सन्ति ये प्रत्यक्षरूपेण परोक्षरूपेण वा शोधपत्रिकाया अस्या प्रकाशने सहायकाः सन्ति। अन्ते च बहुसावधानतया संशोधितायामपपि पत्रिकायामस्यां चेत्स्युरेव त्रुटयस्ताः क्षन्तव्याः क्षमाशीलैर्बुधजनैर्हंसक्षीरन्यायेनेति मे करबद्धं निवेदनम्।

**वेदज्ज्योतिष्मतीत्यस्याः पत्रिकायाः सतां प्रियः ।**
**सप्तमाङ्कोऽपि लोके स्याच्चिरं चित्तानुरञ्जकः।।**

गुणैकपक्षपातिनां सहृदयानां विदुषां शुभाशंसनमपेक्षमाणः-

(प्रो. हंसधरझाः)
प्रधानसम्पादकः

ISSN – 2349-3100

## विषयसूची पृष्ठसंख्या


- "गौणश्चेनात्मशब्दात्" (ब्रह्मसूत्र-१/१/६) — प्रो .बोधकुमार झा — 5
- प्राशस्त्यं गुरुशुक्रयोः (पूर्वार्धम्) — प्रो. हंसधरझाः — 6
- संस्कृतखण्डकाव्यास्थानाम् अलङ्काराणां शिक्षणे नूतन-उपाक्रमाः — योगेन्द्र कुमारः — 9
- कौमुदीस्थवैदिकप्रकरणस्य प्रथमद्वितीयाध्यायवार्त्तिकानुशीलनम् — ऋतम्भरा पाण्डेय — 12
- श्रीमद्देवीभागवतमहापुराणे शिवतत्त्वान्वेषणम् — मौनिका बोल्ला — 15
- परिभाषेन्दुशेखरोक्तानुबन्धविचारः — डा.नवीनकुमारमिश्रः — 19
- फलप्रवचने प्रश्नशास्त्रस्य महत्त्वं वैशिष्टयञ्च — डा. केशव मिश्रः — 22
- साहित्यशास्त्रे अलंकारशास्त्रस्य व्याकरणादि शास्त्रान्तरैः समीक्षणम् — डा.गंगाधरझाः — 26
- परमेश्वरकृतविवरणव्याख्योक्तरीत्या इष्टयुगादितः ग्रहसाधने भगणादीनां संक्षेपकरणविधिः — विजयानन्दः अडिगः बि — 29
- अहिल्याबाई द्वारा निर्मित प्राचीन सोमनाथ मन्दिर — डा.आशीष कुमार चौधरी — 33
- काव्य का स्वरूप — किरण मिश्रा — 35
- **Swami Vivekananda and His Contribution to the Making of Modern India** — **Dr. Shweta Sood** — **38**

 ISSN – 2349-3100

# *दार्शनिक स्तम्भ*

# "गौणश्चेनात्मशब्दात्" (ब्रह्मसूत्र-१/१/६)

प्रो .बोधकुमार झा

**(शब्दार्थ-गौणःचेत्=यदि ईक्षति का प्रयोग गौण अमुख्य अर्थ में है,ऐसा कहा जाय, तो ठीक नहीं है,क्योंकि वेद में जो आत्मशब्दात्=आत्माशब्द का प्रयोग है,वह मुख्य अर्थ को ही बताता है ।)**

वेद में सृष्टि के कारण को संकल्प लेनेवाला बताया है । संकल्प और विकल्प मन में होता है । मन की सत्ता किसी चेतन में होती है, अचेतन में नहीं । सांख्यदर्शन ने जो सृष्टि का कारण प्रधान को माना है, वह चूँकि अचेतन है । इसलिए उसमें संकल्प के अभाव होने के कारण मूल कारण नहीं है, ऐसा पूर्वसूत्र में बताया गया था । इसी बात पर साँख्यदर्शन अपना पक्ष प्रस्तुत करते हुए कहता है कि व्यवहार में अचेतन में भी चेतन की तरह प्रयोग देखा जाता है । जैसे नदी का पानी खतरे के निशान से ऊपर बहने लगता है । बाँध में दरार की संभावना रहती है । ऐसा देखकर हम कहते हैं बाँध टूटना चाहता है । मकान गिरना चाहता है। इस तरह के प्रयोग अचेतन में चेतनता का आरोप कर किया जाता है । इसी तरह वेद में जो संकल्प करने की बात कही गई है,वह अचेतन प्रधान (प्रकृति) में भी लागू होता है । इस आधार पर सृष्टिकारण प्रधान को नकारा नही जा सकता । मैं स्नान करके, भोजन करके शाम को बस से जाऊँगा – ऐसा संकल्प कर जैसे चेतन नियमपूर्वक आचरण करता है,उसी तरह यह प्रधान भी नियमित रूप से सृष्टि में प्रवृत्त होता है । प्रधान से महत्, महत से अहंकार, अहंकार से तन्मात्रा,इन्द्रिय तन्मात्रा से पाँच भूत-आकाश,वायु,अग्नि,जल और पृथिवी उत्पन्न होते हैं । अतःसबका मूल कारण प्रधान ही है । इस सांख्यमत का खण्डन करने के लिए यह ब्रह्मसूत्र उपस्थित होता है । सूत्र कहता है-चूँकि संकल्प के साथ-साथ वेद में 'आत्मा'शब्द का प्रयोग हुआ है, और आत्मा का अर्थ सांख्य का प्रधान कथमपि नहीं हो सकता है । वेद में मन्त्र है-"सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि"(छान्दोग्य०६/३/२) इस मन्त्र में कहा गया है कि अग्नि, जल और अन्न ये तीनों देवता जीवात्मा के रूप में प्रवेश करके सृष्टि करुँ,ऐसा संकल्प लेता है । यहाँ आत्मा को स्पष्ट रूप से जीव कहा गया है । जीव उसे कहते हैं जिसमें जीवन होता है । साँख्य के प्रधान में जीवन नही है वह जड़ है । आत्मा में जीवन होता है । अतः उसे जीव कहने में कोई आपत्ति नहीं है आत्मा के दो रूप प्रसिद्ध है जीवात्मा और परमात्मा । जब तक जीव अपने को परमात्मा से अलग मानता है,तभी तक वह भिन्न है । जब जीवात्मा समझती है अरे मैं तो परमात्मा ही हूँ,फिर वह अभिन्न हो जाता है। इस प्रकार वेद के मन्त्रों का व्याख्यान यदि ब्रह्मपरक मानते हैं,तो जीव, आत्मा ये दोनों शब्द ब्रह्म के लिए सरलतया प्रयुक्त होते हैं । किन्तु प्रधानपरक व्याख्यान में जीव और आत्माशब्द का प्रयोग उसके लिए संभव नही है । बाँध और मकान जो उदाहरण दिया गया है, वह ठीक नहीं है। अचेतन बाँध में टूटने की क्रिया होती है, मकान में गिरने की क्रिया होती है, एसलिए चाहना का प्रयोग हम कर देते हैं । परन्तु ये नहीं कहते कि बाँध या मकान मनुष्य की तरह आचरण करते हैं । इसी तरह कुछ बातें भले ही आरोप करके चेतन की तरह प्रधान के लिए भी प्रयुक्त हो जायँ,पर सृष्टि जैसे चेतनधर्म का आरोप जड प्रधान के लिए कथमपि सम्भव नहीं है ।

> **जो चेतन है,शरीर का अध्यक्ष है,प्राणों का धारक है,वही जीव है,उसी को जीवात्मा कहते हैं**

**आचार्य, व्याकरण-विभाग, क. जे. सोमैया-संस्कृतविद्यापीठ, मुम्बई।**

 ISSN – 2349-3100

# प्राशस्त्यं गुरुशुक्रयोः(पूर्वार्धम्)

✍प्रो. हंसधरझाः

विदितमेव विदां यज्ज्यौतिषं ग्रहनक्षत्राधारितं शास्त्रम्। ब्रह्माण्डोदरमध्यगता ये खलु चराचरजीवाः पदार्था वा तेषु पञ्चमहाभूतानि, त्रयो गुणाः, सप्तधातवश्च ग्रहनक्षत्रप्रभावादेव जायन्ते। क्वचित्पार्थिवांशाधिक्यं, क्वचिज्जलांशाधिक्यं, क्वचिदग्न्यंशाधिक्यं, क्वचिद्वायोरंशः, क्वचिदाकाशस्य भागः, एवञ्च क्वचित् सत्त्वग्रहप्रभावाधिक्यात् सत्त्वगुणांशोऽधिकः, क्वचिद्रजोगुणग्रहप्रभावाधिक्याद्रजोगुणाधिक्यं, क्वचिच्च तमोगुणग्रहप्रभावाधिक्यात् तमोगुणांशोऽधिकः। यथोक्तमपि पाराशरेण **– गुरुशशिरवयः सत्त्वं रजः सितज्ञौ तमोऽर्कसुतभौमौ। एतेऽन्तरात्मनः स्वां प्रकृतिं जन्तोः प्रयच्छन्ति।।**[1]

शाङ्र्धरमते देवा एव ग्रहाणां रूपाणि धृत्वा नराणां पूर्वार्जितानि स्वकीयानि शुभाशुभफलानि प्रयच्छन्ति। यथा – **देवता ग्रहरूपेण मनुष्याणां शुभाशुभम्। फलं प्रागर्जितं यच्च तद्ददाति स्वकीयकम्।।**[2]

लल्लाचार्यमते समस्तनक्षत्रग्रहमण्डलं भूमिं च ब्रह्मा निर्माय आकाशे स्थापयामास। तद्ग्रहमाध्यमेनैव जनाः शुभाशुभानि फलानि लभन्ते। यथा **–सकलमपि धिष्ण्यमण्डलमवनिबद्धं विनिर्मितं धात्रा। तत्र ग्रहा ग्रहेष्वपि शुभाशुभं सर्वजन्तूनाम्।।**[3]

बृहस्पतिना त्वेवमुक्तम् **– ग्रहाधीनं जगत्सर्वं ग्रहाधीना नरा वराः। कालज्ञानं ग्रहाधीनं ग्रहाः कर्मफलप्रदाः।।**

**सृष्टिरक्षणसंहाराः सर्वे चापि ग्रहानुगाः। कर्मणां फलदातारः सूचकाश्च ग्रहाः सदा।।**[4]

एवं मानवानामुन्नतिरवनतिर्वा सर्वमपि ग्रहाधीनमतो ग्रहा इमे पूज्यतमा-। यथा वशिष्ठः –व

**उच्छ्रयपतनानि नृणां खचराधीनानि विशेषतो यस्मात्। अखिलानामपि लोकानां वृद्धिस्तस्माद् ग्रहाश्च पूज्यतमाः।।**[5]

यतो ह्येवंभूतानां लोकोपयोगिनां परमात्मनोंऽशवतां ग्रहाणां गतिस्थित्यादीनां प्रतिपादकमिदं ज्यौतिषशास्त्रमतोऽस्य शास्त्रस्यातीव महत्त्वमिति स्पष्टमेव। एवं प्रशस्तेऽस्मिञ्ज्योतिषशास्त्रे रविचन्द्रयोस्तु मुख्यत्वं वर्तते एव, गुरुशुक्रयोरप्यनल्पमेव स्थानं दरीदृश्यते तत्र। बृहस्पतेः खल्वन्वर्थं नाम कृतं प्राच्यैर्गुरुरिति। ज्योतिषशास्त्रमर्मज्ञेनार्वाचीनविदुषा स्वनामधन्येन श्रीअर्कसोमयाजिधूलिपालमहोदयेनापि प्रतिपादितं यत् - "सर्वेषामपि ग्रहाणां गुरुतमो गुरुरेव। तत्र सर्वेषां ग्रहाणां द्रव्यमाहत्य यावद् भवति तावदधिकद्रव्यवान् गुरुः। ग्रहाणां मध्ये शुक्रं विना गुरुरेवाधिकप्रकाश इत्यपि प्रतिपादितं श्रीअर्कसोमयाजिना।।" इदमेव कारणं यद् गुरोः प्रभावोऽपि तथैव बाहुल्येनापतति पृथिव्याम्। अथ शुक्रो हि बृहस्पतेरपि अधिकप्रकाशः परन्तु लघुबिम्बः। शुक्रोऽयं जातकशास्त्रे वीर्याधिपतिः कथितः। यतो हि शरीरे वीर्यं निखिलानामपि देहधारिणां कृते परमावश्यकं तत्त्वं तथा तद्वीर्यस्याधिपतिः शुक्रः, अतो जीवने शुक्रानुकूल्यं नूनमपेक्षितं स्यादेवेत्यपि स्पष्टमेव विदाम्। इदमेव कारणं यद् बृहस्पतेरनन्तरं शुक्रस्यैव दृश्यते खलु विचारो द्विरागमादिकर्मविशेषेषु।। एवं ज्यौतिषशास्त्रे रविचन्द्रानन्तरं गुरुशुक्रयोरेव महत्त्वं प्रतिपादितम्। यथा **– राहुदोषं बुधो हन्यादुभयोस्तु शनैश्चरः। त्रयाणां भूमिजो हन्ति चतूर्णां दानवार्चितः।।**

**पञ्चानां देवमन्त्री च षण्णां दोषन्तु चन्द्रमाः। सप्तदोषं रविर्हन्ति विशेषादुत्तरायणे।।**[6] इदमेव कारणं यदेकोऽपि केन्द्रस्थो गुरुर्बहून दुष्टयोगान्नाशयति। तथोक्तमपि **– किं कुर्वन्ति ग्रहाः सर्वे यस्य केन्द्रे बृहस्पतिः। मत्तमातङ्गयूथानां शतं हन्ति च केसरी।।**[7] अपि च **– शुक्रो दशसहस्राणि बुधो दशशतानि च। लक्षमेकं तु दोषाणां गुरुर्लग्ने व्यपोहति।।**[8] अथ संवत्सरशब्दः प्रायः सुपरिचित एव लोके। अतिचारविलुप्ताब्दादिविचारे संवत्सरविचारो मुख्यस्तथा संवत्सरविचारो गुरुचाराधीनः।

---

[1] बृहत्पाराशरहोराशास्त्रम् 3/23

[2] बृ.दै.रञ्ज.4-7

[3] बृ.दै.रञ्ज.32/11

[4] बृ.दै.र. 32/16

[5] बृ.दै.र. 32/16

[6] वि.वि.पञ्चाङ्गम 1993-1994 पृ5

[7] लघुपारा.परि.अरि.भ. 15

[8] वि.वि.पचा 1993 पृ. 5

अर्थान्मध्यमबृहस्पतेरेकराशिभोगकालो गौरवं वर्षं संवत्सरनामकं भवति। यथा भास्कराचार्यः – **बृहस्पतेर्मध्यमराशिभोगात् संवत्सरं सांहितिका वदन्ति।**[9]एवं वशिष्ठोऽपि – **मध्यगत्या भभोगेन गुरोर्गौरववत्सरः॥**[10] इदं हि बार्हस्पत्यवर्षं (कल्पकुदिनैः बृहस्पतेः कल्पभगणाः लभ्यन्ते तदा कुदिनेनैकेन किमिति फलमेकस्मिन् दिने गुरोर्गतिमानमतो यद्यनया गत्यैकं दिनं तदा मध्यगुरुराशिकलाभिः किमित्यनुपातेन) 361/02/04/45 सावनदिनाद्यात्मकं भवति। अस्मात्संवत्सरमानात् सावनाब्दः 1/2/4/45 सावनदिनादिना लघुस्तथा सौराब्दः 4/13/25/37 सावनदिनादिना महान् भवति। तत्र स्पष्टो गुरुर्यदि एकस्मिन् वत्सरे एकराशिसञ्चरणं करोति तदाऽसौ शुद्धः संवत्सरः कथ्यते। संवत्सरा इमे सृष्ट्यादिकालादारभ्य क्रमेण विजयादयः षष्ठि भवन्ति। अत एव गतगुरुराशिषु षष्टिभक्तेषु शेषतुल्या विजयादयो गतसंवत्सरा भवन्ति। यथोक्तमपि सूर्यसिद्धान्ते – **द्वादशघ्ना गुरोर्याता भगणा वर्तमानकैः। राशिभिः सहिताः शुद्धाः षष्ट्या स्युर्विजयादयः॥**[11]

चेद् बृहस्पतिरेकस्मिन्नेव संवत्सरे (361/02/04/45) दिनाद्यन्तरे द्विराशिसञ्चरणं कृत्वा पुनः पूर्वराशिं नागच्छति तदासौ महातिचारो लुप्तसंवत्सरश्चोच्यते। यदि द्वाराशिसञ्चरणं कृत्वा वक्रत्वं प्राप्य पूर्वराशिमागच्छति तदासौ अतीचारः कथ्यते। यथा हि संहितायाम् –**यत्रैकराशिसञ्चारो मार्गत्या गुरोर्भवेत्। शुद्धः संवत्सरः स स्यात् सर्वेषां च शुभप्रदः॥ यत्र द्विराशिसञ्चारो ह्यतीचारः स कथ्यते। लुप्ताब्दश्च यदाब्दान्ते पूर्वभं नैति वक्रितः॥ महातिचारसंज्ञोऽसौ सर्वलोकभयङ्करः॥**[12] एवञ्च म.म. महेशठक्कुरः – **पूर्वराशिं परित्यज्यापूर्णे संवत्सरे गुरुः। अतीचारः स विज्ञेयः परराशिगतो यदि॥**[13] व्यवहारसमुच्चयेऽपि – तत्रैव **अतिचारगतो जीवस्तं राशिं नैति चेत्पुनः। लुप्तसंवत्सरो ज्ञेयः गर्हितः सर्वकर्मसु॥**[14]

अत्र गुरुणा तूक्तं यन्मेषवृषकुम्भमीनेषु पूर्वराशेः सकाशात् महातिचारेणायाति पूर्वराशिं च नैति तदा न लुप्तसंवत्सरदोषः। यथा तत्रैव – **मेषे वृषे झषे कुम्भे यद्यतीचारगे गुरौ। न तत्र कालदोषः स्यादित्याह भगवान् यमः॥**

नहि राशिभेदेनैव परिहारः किन्तु देशभेदेनापि विद्यते परिहारः। तत्र पीयूषधारायां लिखितं यदत्रिमते केवलं गङ्गानर्मदानद्योर्मध्यवर्तिदेश एव लुप्ताब्ददोष इति। तथा तत्रैव- **लुप्ताब्ददोषोऽत्रिमतेन मध्ये सोमोद्भावायाः सुरनिम्नगायाः।** अत एवोक्तं श्रीरामचार्येण –**गोऽजान्त्यकुम्भेतरभेऽतिचारगो नो पूर्वराशिं गुरुरेति वक्रितः। तदा विलुप्ताब्द इहातिनिन्दितः शुभेषु रेवासुरनिम्नगान्तरे॥**[15] केषाञ्चिन्मते लुप्तसंवत्सरदोषः केषुचिद्राशिषु अतिशयेन भवति। यथा सारसागरे- **अतिचारगते जीवे धनुः कर्कटमीनगे। लुप्तसंवत्सरो ज्ञेयः विवर्ज्यः सर्वकर्मसु॥**[16] अथ च गुरुशुक्रयोरनयोरुदयास्तबालवृद्धत्वादिविचारश्चातिशयेन विराजते खलु ज्योतिषशास्त्रे, धर्मशास्त्रे च, संस्कारादिषु उपयोगित्वात्। तत्र ग्रहप्रभावेषु ग्रहाणां स्वभावादयस्तु सन्त्येव कारणभूतास्तेषामुदयास्तमयत्वञ्चापि भजतेऽतिमहत्त्वम्। तत्रोदयास्तौ द्विविधौ नैत्यिकौ कालांशापेक्षिकौ च। प्रवहवेगवशाद् भूपरितो भ्रमितग्रहस्य क्षितिजव्यवधानाद् यददृश्यत्वं तदस्तत्वम्, यत्क्षितिजोर्ध्ववर्गत्वत्वेन दृश्यत्वं तदेवोदितत्वमिति नैत्यिकौ सावनात्मकावुदयास्तौ। तथा च ईषद्युतिमतां ग्रहर्क्षाणां सूर्यसान्निध्यात्तत्प्रखरनिकरप्रभावेण यददर्शनं तत्तेषामस्तमयत्वम्, यच्च सूर्यात्कालांशाधिकान्तरितानां दर्शनं तत्तेषामुदयत्वमिति कालांशापेक्षिकावुदयास्तौ। अत्र नैत्यिकावुदयास्तौ सूर्यचन्द्रयोर्यथा महत्त्वजनकौ न तथा भैमादीनाम्। किन्तु चन्द्रादीनां तु कालांशवशगावुदयास्तौ महत्त्वजनकौ। तत्र ज्यौतिषशास्त्रे सिद्धान्तशिरोमणौ बृहस्पतेरेकादश शुक्रस्य दश कालांशाः पठिताः यथा – **दस्रेन्दवः शैलभुवश्च शक्रा रुद्राः खचन्द्रास्तिथयः क्रमेण। चन्द्रादितः काललवा निरुक्ता ज्ञशुक्रयोर्वक्रगयोर्द्विहीनाः॥**[17] अत्रास्तात्पूर्वं ग्रहाणां वृद्धत्वमुदयात्परञ्च बालत्वं भवतीतिहेतोः गुरुशुक्रयोरपि वृद्धत्वबालत्वयोः

---

[9] सि.शि.म.का. 30

[10] सू.सि.म. 56 टिप्प.

[11] सू.सि.म. 56

[12] सू.सि.म.55 टिप्प.

[13] मु.चि.शु.प्र.49 मणि.

[14] मु.चि.शु.53 पीयूष

[15] मु.चि.शु. 53

[16] मु.चि.शि.53 पीयूष

[17] सि.शि.उद. 6

कालौ प्रोक्तौ। तत्र शुक्रस्य पूर्वोदयानन्तरं दिनत्रयं यावत्तथा पश्चिमोदयानन्तरं दशदिनानि यावद्बालत्वं भवति।एवं शुक्रो यदि पूर्वस्यामस्तं याति तदा ततःपूर्वं पञ्चदशदिनानि यावत्, यदि पश्चिमायामस्तं याति तदापि पञ्चदशदिनानि यावदेव वृद्धत्वं तिष्ठति। किन्तु गुरोस्तु बाल्यं वृद्धत्वं वा सर्वदैव पञ्चदशदिनात्मकमेवेत्यपि प्रोक्तं श्रीरामाचार्येण। यथा – **पुरः पश्चाद् भृगोर्वाल्यं त्रिदशाहं च वार्धकम्। पक्षं पञ्चदिनं पक्षं गुरुः पक्षं च सर्वतः।।**[18] एवमेव नारदोऽपि –**पश्चात्प्रागुदितः शुक्रो दशत्रिदिवसं शिशुः। वृद्धः पञ्चदिनं पक्षं गुरुः पक्षं च सर्वतः।।**[19]

आचार्यमहेश्वरमते शुक्रस्य पश्चिमायामुदये सति दशदिनानि यावद् बालत्वम्, अस्ते सति पञ्चदिनात्मकं वृद्धत्वम्। शुक्रो यदि पूर्वस्यामुदेति तदा दिनत्रयात्मकं बालत्वं भवति। केचित्तु गुरोः सर्वदा पञ्चदिनात्मकं वृद्धत्वं शिशुत्वं च कथयन्ति। केचिद्दशदिनात्मकमपरे तु सप्तदिनात्मकं खलु गुरुशुक्रयोर्बाल्यं वृद्धत्वञ्चेति वदन्ति। यथा – **बालः शुक्रो दिवसदशकं पञ्चकञ्चैव वृद्धः। पश्चादौ त्रितयमुदितः पक्षमैन्द्रयां क्रमेण। । जीवो वृद्धः शिशुरपि सदा पक्षमन्यैश्च सूतौ। वृद्धौ प्रोक्तौ दिवसदशकं चापरैः सप्तरात्रम्।।**[20] अत्र केशवार्को यथा – **क्षिपति सप्तदिनान्युदयास्तयोः। सुरगुरुर्भृगुजश्च गतैष्ययोः।।**[21]

अत्र बाल्यवार्द्धक्यविचारे गर्गस्तु देशभेदेन स्वमतं प्रकटितवानस्ति। तद् यथा –**शुक्रो गुरुः प्राक् परतश्च बालो विन्ध्ये दशावन्तिषु सप्तरात्रम्। वङ्गेषु हूणेषु च षट् च पञ्च शेषे तु देशे त्रिदिनं वदन्ति।।**[22]

अर्थाद् विन्ध्याचलपार्श्वस्थप्रदेशे दशदिनात्मकम्, अवन्त्यां (उज्जयिन्याम्) सप्तदिनात्मकम्, वङ्गप्रदेशे षड्दिनात्मकम्, हूण (मेंगोलिया) देशे पञ्चदिनात्मकम्, तथाऽन्यदेशेषु दिनत्रयात्मकं बाल्यं वृद्धत्वञ्चोभयोः स्वीकरणीयमिति। एवमुक्तानि मतानि श्लोकेनैकेन व्यज्यँल्लिखति रामाचार्यः –

**ते दशाहं द्वयोः प्रोक्ते कैश्चित् सप्तदिनं परैः। त्र्यहं त्वात्ययिकेऽप्यन्यैरर्द्धाहं च त्र्यहं विधोः।।**

एवं गुरुशुक्रयोर्बाल्यवार्धक्यविषये मतवैभिन्यमतोऽत्र देशाचारव्यवस्थैव स्वीकार्या। यदा खलु गुरुशुक्राविमौ बालौ वृद्धावस्तौ वा भवतस्तदा बहुविधानि श्रौतस्मार्तकर्माणि न विधेयानीति शास्त्रादेशः। यथा मुहुर्त्तचिन्तामणौ –

**वाप्यारामतडागकूपभवनारम्भप्रतिष्ठे व्रताऽरम्भोत्सर्गवधूप्रवेशनमहादानानि सोमाष्टके।**
**गोदानाग्रयणप्रपाप्रथमकोपाकर्मवेदव्रतं नीलोद्वाहमथातिपन्नशिशुसंस्कारान् सुरस्थापनम्।।**
**दीक्षामौञ्जितविवाहमुण्डनमपूर्वं देवतीर्थेक्षणं सन्यासाग्निपरिग्रहौ नृपतिसन्दर्शाभिषेकौ गमम्।**
**चातुर्मास्य समावृती श्रवणयोर्वेधं परीक्षां त्यजेद् वृद्धत्वास्तशिशुत्व इज्यसितयोर्न्यूनाधिमासे तथा।।**[23]

अर्थाद् गुरुशुक्रयोर्वृद्धत्वास्तशिशुत्वे तथा न्यूनाधिमासे सति वापी दीर्घिका, आरामः उपवनं तडागः पुष्करिणी, कूपः, भवनम् एतेषामारम्भः, प्रतिष्ठा गृहप्रतिष्ठा (गृहप्रवेशः), व्रतारम्भः व्रतोद्यापनम्, षोडशमहादानानि, सोमयागः, अष्टकाश्राद्धम्, गोदानं, केशान्तं कर्म, आग्रयणं, नवान्नपारणं, प्रपा (जलशाला) कर्म, उपाकर्म, वेदव्रतं, नील (काम्य) वृषोत्सर्गः, अतिक्रान्तजातकर्मादिसंस्काराः, देवस्थापनं, दीक्षाग्रहणम्, उपनयनं, मुण्डनं, प्रथमत्वेन तीर्थदेवदर्शनं, सन्यासधारणम्, अग्निहोत्रं, राज्ञः प्रथमदर्शनं, राज्याभिषेकः, अपूर्वयात्रा, चातुर्मास्यव्रतं, समावर्तनं, कर्णवेधः, दिव्यपरीक्षणञ्च न कार्यमिति।

**शेषम् अग्रीमे अङ्के..........।**

**आचार्यः, ज्योतिषविभागः राष्ट्रियसंस्कृतसंस्थानम्, भोपालपरिसरः**

[18] मु.चि.सं. 27 पीयूष

[19] मु.चि.सं. 27

[20] मु.चि.सं. 28 पीयूष

[21] मु.चि.सं. 28 पीयूष

[22] मु.चि.सं. 28 पीयूष

[23] मु.चि.शु. 46-47

ISSN – 2349-3100

# संस्कृतखण्डकाव्यास्थानाम् अलङ्काराणां शिक्षणे नूतन-उपाक्रमाः

✍ योगेन्द्र कुमारः

**संस्कृतसाहित्यम्-**

संस्कृतभाषा काचिद् विशिष्टोत्तमा च भाषैव। विश्वस्य सर्वासु भाषासु सा सर्वप्रथमा सभ्यभाषेति गण्यते। संस्कृतभाषा वेदभाषा, मधुराभाषा, सरलाभाषा, देवभाषा- इत्यादिभिः नामभिः कथ्यते। संस्कृतभाषायामेव ऐतिहासिकवर्णनमपि प्राप्यते। यतोहि अस्माकं देशस्य सर्वाणि शास्त्राणि यथा- वेदोपनिषद्दर्शन -ब्राह्मणारण्यकगीतारामायणादीनि संस्कृतमयान्येव विलिख्यते स्म। शब्दार्थयोरेव साहित्यम्। तत्र लौकिकं वैदिकञ्च प्रसिद्धम्। काव्यं हि कविकर्म, ते च कवयः क्रान्तदर्शिनः ऋषयः। उक्तं हि- **"नानृषिः कविरित्युक्तम्, ऋषिश्च किल दर्शनादिति।"** छन्दिरहितानि गद्यानि छन्दोमयानि च पद्यानि कथ्यन्ते। लौकिकानि हि काव्यानि क्वचिन्महाकाव्यानि सर्गबन्धीनि, खण्डकाव्यानि, कथाः, आख्यायिकेत्यादीनि प्रसिद्धानि।

**नूतन-उपाक्रमाः**

परिवर्तनं जगतः नियमः विद्यते। परिवर्तनेऽस्मिन् संसारे सर्वदा नवीनता आयाति। क्षणे प्रतिक्षणे संसारे सर्वत्रैव परिवर्तनं भवन्नस्ति, यथा- परिवारे, व्यवसाये, विद्यालये, समाजे, शिक्षणे चादयः। शिक्षणेऽपि **नूतन-उपाक्रमान्** दृष्टुं शक्यते। **नूतन-उपाक्रमाः** नाम- नवीनपरिवर्तनम् अर्थात् शिक्षणे विधिषु नवीनपरिवर्तनमिति, तर्हि अहमत्र अलङ्काराणां शिक्षणे केषाञ्चन नूतन-उपाक्रमानां विषये नवीनविधीः वदामि, येन प्रयोगेण छात्रान् अवगमनं सरलतया सुगमतया भवितुमर्हति। यथा-

क- **SKYPE-** अद्यस्मिन् काले "स्काइप" माध्यमेन अलङ्काराणां शिक्षणं सम्यक्तया सरलतया भवति, यतोहि येन माध्यमेन अध्यापकः एकस्मिन् स्थले उषित्वा अन्यस्मिन् स्थले (कुत्रापि) अध्यापनं करोति। यथा- अध्यापकः मुम्बईनगर्यां निवसति, जिज्ञासु/छात्रः वा कर्नाटके निवसति। कर्नाटकीयछात्रं अलङ्कारपठने समस्या अथवा शङ्का वा जिज्ञासा विद्यते, तर्हि अध्यापकः सङ्गणकेन स्काइपमाध्यमेन सरलतया अलङ्काराणां शिक्षणं मुम्बईनगर्यां उषित्वा एव कुत्रापि पाठयितुं शक्यते।

ख- **WHATSAPP-** साम्प्रतं सर्वेषां जनानां करे (हस्ते) "एन्ड्रायड" दूरध्वनिः विद्यते, तत्र सर्वे जनाः "वाट्सअप" इत्यस्य उपयोगं कुर्वन्तः सन्ति किल। यदि अलङ्काराणां शिक्षणार्थं शिक्षकः आडियो/वीडियो/लेखनेन वा माध्यमेन पाठनक्रियां करिष्यति, तु जिज्ञासवः समयाभावेऽपि सुगमतया सुविधया च विषयवागमनं कर्तुमर्हन्ति खलु।

ग- **VIBER-** यथा वाट्सअप माध्यमेन पाठनक्रिया सम्भाव्यते तथैव 'वाइवर' द्वारा अपि सम्यक्तया अलङ्काराणां शिक्षणं भवितुमर्हति।

घ- **ONLINE CLASSES-** यदा-कदा एवं भवति यत् छात्रः अध्यापकः च द्वौ दूरे भवतः, यस्मात् कारणात् शास्त्राध्ययनेन छात्राः वञ्चितः न भवेत् तस्मात् कारणात् यदा अध्यापकस्य छात्रस्य च पार्श्वे कालः समुपलभ्यते, तदैव अध्यापकः कुतोऽपि 'आनलाइनकक्षायाः' सञ्चालनं कृत्वा छात्राणां कल्याणं कर्तुं शक्यते।

ङ- **SOCIAL MEDIA-** अनया शास्त्रस्य अध्यापनं सुकरं भवति। **कथम्?** शास्त्राणां विस्तृतज्ञानं तत्र स्थापनीयम्, छात्राः तत्र दृष्ट्वा पठित्वा च स्वज्ञानमभिवृद्धिं करिष्यन्ति। यतोहि साम्प्रतं छात्राः 'सोसियल मीडिया-**FACEBOOK** माध्यमेन अपि स्वज्ञानस्य प्रसारं कुर्वन्ति, अतः शिक्षकः एतेन माध्यमेन अलङ्काराणां शिक्षणे नवीनता आनयितुं शक्यते।

च- **SOFTWEAR-** एतेन माध्यमेन तु बहु सम्यक्तया शिक्षणे सिद्धता भवन्नस्ति, यतोहि अलङ्कारविषयं स्वीकृत्य नवीनं 'सोफ्टवेयर' इति निर्मातुं शक्यते।

छ- **POWERPOINT-** अद्यस्मिन् काले अधिकतराः अध्यापकाः 'पावरपाइन्ट' इत्यस्य उपयोगं कुर्वन्ति। यदि अलङ्कारशिक्षणायापि 'स्लाइड' इति निर्मीय छात्राणाङ्कृते अवगमनं कर्तुं सम्भाव्यते।

**खण्डकाव्यम्-**

**क- मृगाङ्कशतके तथा नीतिशतके प्रयुक्तानामलङ्काराणां विवरणमत्र क्रियते-**

संस्कृतसाहित्ये मृगाङ्कशतकनीतिशतके साम्प्रतमप्रसिद्धे कृती स्तः। अतः ययोः काव्ययोः सामान्यजानानाङ्कृते सहृदयसमक्षं प्रदर्शनाय अस्य लेखस्य औचित्यमस्ति। अपूर्वकृतीनां सांस्कृतिकमहत्त्वप्रकाशने औचित्यमस्ति, यतोहि द्वयोः काव्ययोः यत् सांस्कृतिकमहत्त्वं वर्त्तते, तस्य सविस्तरं प्रकाशनं करणीयम्। अप्रसिद्धानां कृतीनां साहित्यप्राधान्यविषयप्रस्तुतौ औचित्यं वर्त्तते। प्रत्यक्षं चालङ्कारप्राचुर्यं मृगाङ्कशतके-

**हिमकरकोमलतल्पे शयिताया कामदयितायाः। श्रवणदलादिव गलिता कुवलयकलिका कलङ्कोऽयम्॥**इति॥[1]

इत्यस्मिन् पद्ये श्रवणदलादिव गलिता कुवलयकलिकेति भेदे साधर्म्यं सिद्धमेवेति उपमा स्पष्टा। यथा वा-

**कलयति कुटिलभृकुटिमोषधिनाथः कलङ्ककपटेन। मयि जीवति कथमनतुर्मम मित्रं कुसुमधन्वेति॥इति॥**[2]

**कुसुमशरस्य जिगीषोः शशिनं धवलं वितानमाकलये। मध्ये स्यूतो विलसति नीलश्चोलः कलङ्कमिषात्॥इति॥**[3]

**स्मरशबरनीयमानं जलधेः कमपीन्दुमण्डलं मीनम्। कलये कलङ्कमन्तर्निगडितबडिशं वहन्तममुम्॥इति॥**[4]

**नभसि सरसि नवताराकुमुदिन्याः कन्दमिन्दुमाकलये। दिवसद्विपपरिमर्दनपदमिदमङ्के कलङ्कमिषात्॥इति॥**[5]

एतेषूदाहरणेषु सर्वत्राङ्कमिषात्, कलङ्ककपटेन, कलङ्कमिषात्, कपटात् कलङ्कस्येत्यदि प्रकृतं यन्निषिध्यान्यत् सर्वं साधितमित्यपह्नुतिः, एवञ्च नीतिशतकस्थान्यपि तत्वानि सुविस्तरं द्रष्टुं शक्यते। अप्रसिद्धेषु अपि विशिष्य शतककाव्यादिषु खण्डकाव्यप्रायेषु व्यज्यमानं सामाजिकप्राधान्यं प्रकाशयितुमपि युक्तिः वर्त्तते एव। व्याख्यारहितानां व्याख्यासहितानां वा खण्डकाव्यानां व्याख्यापुरस्सरं प्रस्तुतेः औचित्यं वर्त्तते। खण्डकाव्येषु विशिष्य शतकादीनां सामान्यतया रस-भाव-अलङ्कारादीनां प्राधान्याप्राधान्यपुरस्सरं सहृदयानां पुरस्तात् प्रदर्शने औचित्यं सर्वदा वर्त्तते एव।

ख- नीतिशतके केचन पद्येषु अलङ्काराः प्रयुज्यन्ते-

**(१)- उपमालङ्कारः-**

द्वयोः वस्तुनोः भेदे समानधर्मः प्रतिपाद्यते, तत्र उपमा कथ्यते। यथा- **अपापाः कतिचिद्भूपाः कूपा इव घनोदयैः। भूरि जीवनसम्पूर्णाः तृष्णां पुष्णन्त्युपेयुषाम्॥**इति॥[6] अस्मिन् पद्ये भूपा-कूपाः इव एतेन प्रतिपादनेन भूपैः साधर्म्यं कूपेषु क्रियते।

**(२)- काव्यलिङ्गमलङ्कारः-**

यस्य अर्थस्य समर्थनं करोति, तस्यार्थस्य समर्थनमेव काव्यलिङ्गमलङ्कारः उच्यते। यथा-**कवीनां कीर्तिमाश्रित्य कोशमाशु वितन्वताम्। नीळि(ली)कानां क्षणाल्लक्ष्मीः निशान्तेऽपि महीयते॥**इति॥[7] अस्मिन् पद्ये निशान्तेऽपि (रात्रि के अन्त में ही लक्ष्मी) रात्र्यन्ते लक्ष्मी महती भवति, एतस्य विषयस्य समर्थनमेव काव्यलिङ्गमलङ्कारः भवति।

**(३)-दीपकालङ्कारः-**

वर्णनकरणे योग्यः तथा येन वर्णनं क्रियते तयोः वस्तुनोः धर्मयोरेकता यदि भवति, तत्र दीपकालङ्कारः भवति। यथा-**परपक्षात्क्षयं प्रेक्ष्य मित्रमाशु विशन्ति ये।वर्धते मण्डलं तेषां सत्यं सकलया श्रिया॥**इति॥[8]पद्येऽस्मिन् मित्र मण्डलानां तथा सत्यस्य पूर्णश्री इत्यस्य वर्धने धर्मः एकैव भवति, अतः अत्र दीपकालङ्कारः वर्त्तते।

**(४)- उल्लेखालङ्कारः-**

अनेकजनैः द्वारा अथवा अनेकविषयैः द्वारा अथवा एकविषये अनेकप्रकाराणामुल्लेखः क्रियते, अत्र वाच्यालङ्कारः उल्लेखः भवति। यथा-**कलुषाशयमप्याशु प्रसन्नं कुरुते यतः। सन्तः पश्यन्तु शतकं शान्तया कलया गिरा॥**इति॥[9] इत्यस्मिन् पद्ये सज्जनानां दर्शनं शान्तरूपेण कलायाः रूपे, वाक्रूपे, एकस्मिन्नेव शतकोपरि भवति। इत्थं शान्तता-कलात्वं-वाचकत्वञ्च एकस्मिन्नेव विषये उल्लेखः भवति।

**उपसंहारः-**

अहमद्य ‘शास्त्रशिक्षणे नूतन-उपाक्रमाः’ इति विषयं स्वीकृत्य ‘संस्कृतखण्डकाव्यस्थानाम् अलङ्काराणां शिक्षणे नूतनोपक्रमाः’ इति स्वशोधलेखं लिखितवान्। अनेन शोधेन वयं दृष्टवन्तः यत् प्राचीनशास्त्रशिक्षणापेक्षया यदि शास्त्रशिक्षणे वार्त्तमानिकनूतन-उपाक्रमान् प्रयुञ्ज्यन्ते, तर्हि छात्राः सम्यक्तया विषयमवगन्तु शक्नुवन्तीति॥

**पादटीका-**

1 .मृगाङ्कशतकम्- ४२

2 .मृ. श. -७०

3 मृ. श. -८२

4 मृ. श. -८७

5 मृ. श. -९५

6 नीतिशतकम्– ५९

7 नी. श. -६२

8 नी. श. -८२

9 नी. श. -१०३

सन्दर्भग्रन्थसूची-


१- अलङ्कारशास्त्रस्येतिहासः- डा. जगदीशचन्द्र मिश्रः, चौखम्बा प्रकाशनम्, वाराणसी, प्रथमसंस्करणम्, २००१।

२- अलङ्कारकौस्तुभः, कविकर्णपुरगोस्वामी, वारेन्द्र प्रकाशनम्, प्रथमसंस्करणम्।

३- काव्यादर्शः- दण्डीविरचितः, श्रीशिवनारायणशास्त्री, परिमलससंस्कृतग्रन्थमाला २७, परिमल पब्लिकेशन्स, दिल्ली।

४- काव्यादर्शः- योगेश्वरदत्तशर्मा, नाग पब्लिकेशर्स, नवदेहली।

५- काव्यप्रकाशः- श्रीमम्मटभट्टविरचितः, विद्याभवन प्राच्यविद्या ग्रन्थमाला ५९, चौखम्बाविद्याभवनम्, वाराणसी, द्वितीयसंस्करणम्- १९९४

६- काव्यप्रकाशः- श्रीमम्मटभट्टविरचितः, नागेश्वरी टीकाकृतः, चौखम्बासंस्कृतसंस्थानम्, वाराणसी, अष्टमसंस्करणम्-१९९५

७- काव्यप्रकाशः- श्रीमम्मटभट्टविरचितः, प्रो. विश्वनाथभट्टाचार्यः, प्रो. जयशङ्करलाल त्रिपाठी, काशी हिन्दू विश्वविद्यालयसंस्कृतग्रन्थमाला, काशी हिन्दू विश्वविद्यालय वाराणसी- २००३

८- काव्यालङ्कारः- श्रीभामहाचार्येण विरचितः, काशीसंस्कृतग्रन्थमाला ६१, चौखम्बासंस्कृतसंस्थानम्, वाराणसी, तृतीयसंस्करणम्- २००२

९- काव्यालङ्कारसारसङ्ग्रहः- उद्भटभट्टकृत, डा. रमणकुमार शर्मा, विद्यानिधि प्रकाशनम्, दिल्ली- २०१०

१०- काव्यालङ्कारसूत्राणि- श्रीवामनाचार्यविरचितम्, चौखम्बासंस्कृतग्रन्थमाला, वाराणसी-२००५

११- काव्यालङ्कारः- श्रीभामहाचार्येण विरचितः, बिहारराष्ट्रभाषापरिषद्, पटना- १९६२

१२- मलयमारुतः- वि. राघवन्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली- १९७८

१३- छन्दःसूत्रम्- श्रीपिङ्गलाचार्यविरचितम्, श्रीमदखिलानन्दशर्मा गुरुकुल वृन्दावन स्नातकशोधसंस्थानान्तर्गत, आचार्य धर्मेन्द्र शास्त्री प्राच्यविद्यापीठ, पीतमपुरा, नवदेहली- २०००

१४- साहित्यदर्पणः- विश्वनाथविरचितम्, चौखम्बासंस्कृतसंस्थानम्, वाराणसी- २०११

१५- ध्वन्यालोकः- श्रीमदानन्दवर्धनाचार्य विरचितः, श्री अभिवनगुप्तविरचितः ‘लोचन’ समन्वितः, डा. गङ्गासागररायः, चौखम्बासंस्कृतग्रन्थमाला ४२, चौखम्बासंस्कृतभवन, वाराणसी, प्रथमसंस्करणम्- २००४

१६- ध्वन्यालोकः- आचार्यचण्डिकाप्रसादशुक्लसम्पादितः, विश्वविद्यालय-प्रकाशनम्, वाराणसी, प्रथमसंस्करणम्- १९८१

१७- नाट्यशास्त्रम्- आचार्यभरतमुनि विरचितः, परिमल पब्लिकेशन, दिल्ली, प्रथमसंस्करणम्- १९९८

१८- विद्यारश्मिः- राष्ट्रियसंस्कृतसंस्थानम्, क. जे. सोमैया संस्कृतविद्यापीठम्, मुम्बई- २०१२-१३

१९- साहित्यदर्पणः- विश्वनाथविरचितम्, काशीसंस्कृतग्रन्थमाला १४५, चौखम्बासंस्कृतसंस्थानम्, वाराणसी, पुनर्मुद्रणम्- २०११

२०- संस्कृतनिबन्धशतकम्- डा. कपिलदेवद्विवेदीविरचितम्, विश्वविद्यालय-प्रकाशनम्, वाराणसी, पञ्चदशसंस्करणम्- २०१३.


**राष्ट्रियसंस्कृतसंस्थानम्, क. जे. सोमैया संस्कृतविद्यापीठम्, विद्याविहार, मुम्बई (पूर्व)- 400077**

# कौमुदीस्थवैदिकप्रकरणस्य प्रथमद्वितीयाध्यायवार्त्तिकानुशीलनम्

✍ऋतम्भरा पाण्डेय

सिद्धान्तकौमुद्याम् अनेकानि प्रकरणानि सन्ति । तेषु प्रकरणेषु अन्यतममस्ति वैदिकप्रकरणम् । अस्मिन् प्रकरणे वैदिकमन्त्रेषु प्रयुक्तानां शब्दानां साधुत्वविधानार्थं पाणिनिकृतसूत्राणां कात्यायनकृतवार्त्तिकानाञ्च उदाहरणपुरस्सरं विवेचनं कृतम् । इदं प्रकरणम् अष्टाध्यायेषु विभक्तमस्ति । एतेषु प्रकरणेषु सप्तत्रिंशत् वार्त्तिकानि सन्ति । तेषु प्रथमद्वितीयाध्यायवार्त्तिकानि अत्र अनुशीलितानि । तत्र प्रथमम् – वा .नभोऽङ्गिरोमनुषां वत्युपसंख्यानम् ।

कौमुद्यामुच्यते- 'यचि भम्'। नभोऽङ्गिरोमनुषां वत्युपसंख्यानम् । नभसा तुल्यं नभस्वत् । भत्वाद्रुत्वाभावः । अङ्गिरस्वदङ्गिरः । मनुष्वदग्ने । जनेरुसिः इति विहित उसिप्रत्ययो मनेरपि बाहुलकात् । इदं वर्त्तिकं महाभाष्ये' यचि भम्'[1] इति सूत्रे पठितम् । सिद्धान्तकौमुद्याञ्च वैदिकप्रकरणे प्रथमेऽध्याये' षष्ठीयुक्तश्छन्दसि वा 'इति सूत्रेऽस्ति । नभोऽङ्गिरो मनुषामिति षष्ठीबहुवचनान्तम् । नभश्च अङ्गिरश्च मनुश्चेति नभोऽङ्गिरोमनुषः तेषां नभोऽङ्गिरोमनुषाम् इतरेतरयोगद्वन्द्वसमासः। वतीति लुप्तसप्तम्यन्तनिर्देशः । उपसङ्ख्यानमिति प्रथमैकवचनान्तम् । एतेन वार्त्तिकेन वेदे नभस् , इत्येषां शब्दानां वति -अङ्गिरस्, मनुष् प्रत्यये परे भसञ्ज्ञायाः विधानं भवति । वतिप्रत्ययश्च तृतीयान्तेन समर्थसुबन्तेन जायते । स च 'तेन तुल्यं क्रियाचेद्वतिः'[2] इति सूत्रेण विधीयते । अतोऽत्र सूत्रस्य विधेयज्ञानाय प्रथमं भसञ्ज्ञायाः ज्ञानमावश्यकं केयं भसञ्ज्ञेति ?

तत्रोच्यते -'यः कोऽपि शब्दोऽस्ति लौकिको वैदिको वा तत्सर्वं भसञ्ज्ञापदसञ्ज्ञायाः अन्तर्गतोऽस्ति'। अष्टाध्याय्यां प्रथमाध्याय्ये चतुर्थपादे भसञ्ज्ञापदसञ्ज्ञयोश्च अधिकारोऽस्ति । तत्र पदसञ्ज्ञाविधायकानि एतानि सूत्राणि सन्ति ।स्वादिष्वसर्वनामस्थाने , सुप्तिङन्तं पदम् , नः क्ये , सिति चेति पदसञ्ज्ञाविधायकानि । यचि भम् , तसौ मत्वर्थे, अयस्मयादीनिच्छन्दसीति च भसञ्ज्ञासूत्राणि । अत्र पदसञ्ज्ञाविधायकं मुख्यसूत्रं 'सुप्तिङन्तं पदम्[3], भसञ्ज्ञाविधायकञ्च यचि भमित्यस्ति । भसञ्ज्ञा पदसञ्ज्ञायाः बाधिका अस्ति । ' यचि भम्' इति सूत्रे 'स्वादिष्वसर्वनामस्थाने'[4] इति सूत्रमनुवर्तते तेन सूत्र ,स्यायमर्थः – यकारादिष्वजादिषु च कप्प्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं भसञ्ज्ञं स्यादिति । असर्वनामस्थानम् = 'सुडनपुंसकस्य'[5] इति सूत्रेण अक्लीबशब्दात् परेषां स्वादिपञ्चवचनानां सर्वनामस्थानसञ्ज्ञा भवति । तेन अक्लीबशब्दात् पराः सु-जश्-औ-अम्औट् -प्रत्ययाः सर्वनामस्थानसञ्ज्ञकाः कथ्यन्ते तदतिरिक्तम् असर्वनामस्थानमुच्यते । 'स्वादिष्वसर्वनामस्थाने'[6] इदं सूत्रं कप्प्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु परतः पूर्वस्य पदसञ्ज्ञां करोति । कप्प्रत्ययावधिषु = तृतीयाध्यायस्य 'प्रत्यय' इति सूत्रादारभ्य पञ्चमाध्यायान्तम् अवधिः येषां प्रत्ययानां तादृशेषु प्रत्ययेष्वित्यर्थः । एवञ्च तत्र विद्यमानाः प्रत्ययाः सर्वे पदसञ्ज्ञकाः भवन्ति । तत्र 'यचि भम्' इति सूत्रेण नियम्यते यद् असर्वनामस्थाने यकारादिप्रत्यये परे अजादिप्रत्यये च परे पूर्वशब्दस्य भसञ्ज्ञैव भवतीति । न चोभयोः भपदसञ्ज्ञयोः एकस्मिन् शब्दे समावेशो भवितुमर्हति 'आ कडारादेका सञ्ज्ञा'[7] इति सूत्रेण निषेधात् , एकस्य एकसञ्ज्ञाया एव नियमनात् । एवञ्च द्वयोः सञ्ज्ञयोः एकत्रासम्भवात् का सञ्ज्ञा विधेया का च नेति विप्रतिपत्तौ सत्यामुभयोः सञ्ज्ञयोः सावकाशत्वे 'विप्रतिषेधे परं कार्यम्'[8] इति नियमशास्त्रेण परसञ्ज्ञायाः भसञ्ज्ञाया एव प्रवृत्तिः । अर्थात् परत्वात् भसञ्ज्ञा पदसञ्ज्ञां बाधत इति भावः । भसञ्ज्ञायाः सावकाशत्वे पदसञ्ज्ञायाश्च निरवकाशत्वे पदसञ्ज्ञा एव भवति । वैदिकोदाहरणानि- नभस्वत् । अङ्गिरस्वदङ्गिरः । मनुष्वदग्ने । लौकिकप्रयोगः –नभोवत् । अङ्गिरोवदित्यादि ।

वेदे नभस्– अङ्गिरस् - मनुष् इत्येतेभ्यः शब्देभ्यः वतिप्रत्यये परे पदसञ्ज्ञायाः सावकाशत्वेऽपि तं बाधित्वा अनेन वार्त्तिकेन भसञ्ज्ञा विधीयते । अत्र नभसा तुल्यमित्यर्थे 'तेन तुल्यं क्रिया चेद्वतिः' इति सूत्रेण वति प्रत्यये कृते नभस् वत् इति स्थिते 'कृत्तद्धितसमासाश्च'[9] इति सूत्रेण तद्धितान्तनिमित्तकप्रातिपदिकसञ्ज्ञायां 'सुपो धातुप्रातिपदिकयोः' इत्यनेन सुपो लुकिप्रत्य ,यलक्षणपरिभाषया पदत्वनिमित्तकसकारस्य रुत्वे' हशि च' इत्यनेन उत्वे प्रथमैकवचने क्लीबे च लोके 'नभोवत्'[10] इति रूपम् । वेदे तु अनेन वार्त्तिकेन भसञ्ज्ञाविधानात् भत्वात् रुत्वाभावः । तेन 'नभस्वत्' इति रूपम् । एवमेव अङ्गिरसा तुल्यम् इत्यर्थे वतिप्रत्यये भसञ्ज्ञायां रुत्वाभावे अङ्गिरस्वदङ्गिरः इति रूपं सिद्ध्यति । **' मनुषा तुल्यं मनुष्वदग्ने'** अत्र भत्वाद्रुत्वाभावे सकारस्य 'आदेशप्रत्यययोः' इत्यनेन षत्वम् । लेके तु पदसञ्ज्ञायां 'ससजुषो रुः'

इत्यनेन रुत्वं स्यात् न तु षत्वम् । वस्तुतस्तु मनुष्वत् इत्यत्र मनुश्शब्दः मन् धातोः 'जनेरुसिः' इति सूत्रेण बाहुलकात् उसि प्रत्यये कृते सिद्ध्यति । भसञ्ज्ञायां षत्वे कृते मनुष्वत् इति रूपम् भवति । तत्रेदं बोद्ध्यम् – औणादिकेन 'जनेरुसिरि'ति सूत्रेण 'जन्'धातोरुसिप्रत्ययो विधीयते, तथापि अनेन सूत्रेण बहुलग्रहणात् 'मन्'धातोरपि उसि प्रत्ययो विधीयते । बहूनर्थान् लातीति बहुलम् । ला आदाने इति धातोः 'आतोऽनुपसर्गे कः'[11] इति कः । बहुलस्य भावो बाहुलकम् । इदं चतुर्विधम्'– क्वचित्प्रवृत्तिःक्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव । विर्धेविधानं बहुधा समीक्ष्य चर्तुविधं बाहुलकं वदन्ति ।।[12]' इत्यभियुक्तोक्तेः ।

वा. वृषण्वस्वश्वयोः। सिद्धान्तकौमुद्याम्- वृषण्वस्वश्वयोः। वृषन् वर्षुकं वसु यस्य स वृषण्वसुः । वृषा अश्वो यस्य स वृषणश्वः । इहान्तर्वर्त्तिनीं विभक्तिमाश्रित्य पदत्वे सति नलोपः प्राप्तो भत्वाद्वार्यते । अत एव 'पदान्तस्य' इति णत्वनिषेधोऽपि न । अल्लोपो न इत्यल्लोपो न । अनङ्गत्वात् इति । इदमपि वार्त्तिकं पूर्ववत् महाभाष्ये' यचि भम्'[13] इति सूत्रे उपदिष्टमस्ति । एवञ्च सिद्धान्तकौमुद्यां वैदिकप्रकरणे प्रथमेऽध्याये 'षष्ठीयुक्तश्छन्दसि वा' इति सूत्रेऽस्ति । 'वृषण्वस्वश्वयोः' इत्यत्र वृषणिति प्रथमैकवचनान्तम् । वस्वश्वयोरिति च सप्तमीद्विवचनान्तम् । वसु च अश्वश्चेति वस्वश्वौ ,तयोः वस्वश्वयोः इतरेतरयोगद्वन्द्वः । वृषणित्येतद् वसुशब्देऽश्वशब्दे च परतः भसञ्ज्ञं भवतीत्यर्थः । अर्थात् वृषण्वस्वश्वयोः इति वार्त्तिकेन वसुशब्दे परे अश्वशब्दे च परे वृषणशब्दस्य भसञ्ज्ञा भवति । कैयटमते एतानि छन्दोविषयाणि निपातनानि सन्ति । वैदिकोदाहरणम् –वृषणश्वः । वृषण्वसुः । वृषन् वर्षुकं वसु यस्य स वृषण्वसुः । 'वसु तोये वने मणौ' इति कोषः[14] । वृषन् = वर्षुकम्=वसु , धनं यस्य स वृषण्वसुः । अत्रानेन भत्वात् नलोपाभावः । लोके तु 'वृषन् सु वसु सु' इत्यत्र सुपो धातुप्रातिपदिकयोः इति सुपो लुकि प्रत्ययलक्षणेन अन्तर्वर्त्तिनीं विभक्तिमाश्रित्य पदसञ्ज्ञायां, पदत्वात् 'नलोपः प्रातिपदिकान्तस्य'[15] इत्यनेन नलोपे वृषवसुः इति रूपम् । एवमेव वृषा अश्वो यस्य सः वृषणश्वः । अत्रापि भत्वात् नलोपाभावः । लोके तु 'वृषाश्वः' इत्येव ।

तथा हि वेदे अनेन वार्त्तिकेन पदसञ्ज्ञां बाधित्वा भसञ्ज्ञायाः जायमानत्वात् नलोपाभावस्तु भवत्येव, सहैव पदसञ्ज्ञाराहित्यात् 'पदान्तस्य' इति सूत्रेण णत्वनिषेधोऽपि न भवति नकारस्य पदचरमावयवत्वाभावात् । एवञ्च 'अल्लोपोऽन'[16] इत्यनेन अकारलोपोऽप्यत्र न भवति, अङ्गसञ्ज्ञाया अभावात् । अन्तर्वर्त्तिविभक्त्याः लोपे सति प्रत्ययपरत्वाभावादङ्गसञ्ज्ञाभावः । वसुशब्दस्य च प्रत्ययत्वं नास्त्येवेति प्रत्ययपरत्वाभावः । तेन वृषणश्वःवृषण्वसुरिति रूपं भवति ।

वा. उभयसञ्ज्ञान्यपीति वक्तव्यम् । मूलम् - (.सि.कौ) उभयसञ्ज्ञान्यपीति वक्तव्यम् । स सुष्टुभा स ऋक्वता गणेन । पदत्वात्कुत्वम् । भत्वाज्जश्त्वाभावः । जश्त्वविधानार्थायाः पदसञ्ज्ञाया भत्वसामर्थ्येन बाधात् । नैनं हिन्वन्त्यपि वाजिनेषु । अत्र पदत्वाज्जश्त्वम् । भत्वात्कुत्वाभावः ।

इदं वार्त्तिकं सिद्धान्तकौमुद्याम् 'अयस्मयादीनि च्छन्दसि' इति सूत्रेऽस्ति । एवञ्च महाभाष्येऽपि अस्मिन्नेव सूत्रे उपदिष्टमस्ति । अयस्मयादीनि शब्दरूपाणि छन्दसि उभयसञ्ज्ञान्यपि= भपदसञ्ज्ञके भवन्तीत्यर्थः । तथा च अयस्मयादीनि शब्दरूपाणि उभयसञ्ज्ञानि ज्भसञ्ज्ञानि पदसञ्ज्ञानि च भवन्ति । भपदस -ज्ञयोः फलम् आह – पदत्वात्कुत्वम् भत्वाज्जश्त्वाभाव इति । अयसो विकारः अयस्मयम् । अत्र नागेशमते 'द्व्यचश्छन्दसि'[17] इति सूत्रेण मयट् भवति ,न तु' मयड्वैतयोर्भाषायामभक्षाच्छादनयो'रित्यनेन सूत्रेण , एतेन भाषायामेव मयटो विधानात् । तथापि प्राचीनमते तु अत् 'मयड्वैतयोर्भाषायामिति'[18] सूत्रेणैव मयट्प्रत्ययो विधीयते ,तेषां मते यद्यपि सूत्रे भाषाग्रहणमस्ति , तथाप्यस्य अयस्मयादिगणान्तर्गतत्वात् प्रकृतसूत्रेण साधुत्वविधानाच्छन्दस्यपि मयड्भवतीति भत्वाद्रुत्वं न भवति । अयस्मयमित्यत्र पदसञ्ज्ञायाः भत्वेन बाधात् ससजुषोरुरिति सूत्रेण प्राप्तरुत्वाभाव इति च वदन्ति[19] । तेन वेदे अयस्मयं वर्म , अयस्मयानि पात्राणीत्यादीनि रूपाणि । लोके तु पदसञ्ज्ञायां' हशि च 'इति उत्वे च अयोमयमिति रूपम् ।वेदे उभयसञ्ज्ञाप्रयुक्तमपि कार्यं क्वचिद्दृश्यते यथा ऋक्वतेति । ऋचोऽस्य सन्तीति मतुप् । अत्र पदत्वात् 'चोःकुः' इत्यनेन कुत्वम् । भत्वात् जश्त्वाभावः । पदत्वात् 'झलां जशोऽन्ते' इत्यनेन जश्त्वम्प्राप्तम् भत्वात् तन्निषिध्यते तेन वेदे ऋक्वता इति रूपम् । लोके तु जश्त्वे कृते ऋग्वता इति रूपं भवति । एवमेव वाजिनेषु इत्यत्रापि पदत्वात् जश्त्वम् , ' जश्त्वानन्तरंचोःकुरि'त्यनेन कुत्वे प्राप्ते परं भसञ्ज्ञकत्वात् कुत्वाभावे सप्तमी बहुवचने वाजिनेषु इति रूपं भवति ।

वा. षष्ठ्यर्थे चतुर्थीति वाच्या । मूलम् (सि. कौ.) –या खर्वेण पिबति तस्यै खर्वः ।

इदं वार्त्तिकं सिद्धान्तकौमुद्यां 'चतुर्थ्यर्थे बहुलं छन्दसि' इति सूत्रे अस्ति । एवञ्च माहाभाष्येऽपि 'चतुर्थ्यर्थे बहुलं छन्दसि' अस्मिन्नेव सूत्रे अस्ति । छन्दसि षष्ठीविभक्त्यर्थे चतुर्थी विभक्तिः भवति इत्यर्थः । वैदिकोदाहरणानि - या खर्वेण पिबति तस्यै खर्वः । या दतो धावते तस्यै श्यावदन् । या नखानि निकृन्तते तस्यै कुनखी । याऽऽङ्क्ते तस्यै काणः ।

 ISSN – 2349-3100

याऽभ्यङ्क्ते तस्यै दुश्चर्मा । या केशात् प्रलिखिते तस्यै खलितः । अहल्यायै जारः (तै.2-5-1-7) ।एतेन वार्त्तिकेन एतेषु उदाहरणेषु 'तस्याः' इति षष्ठ्याः प्रयोगे प्राप्ते षष्ठ्यर्थे 'तस्यै' इति चतुर्थी विभक्तिः विधीयते । एवमेव वेदे 'अहल्यायाः जारः' इत्यर्थे 'अहल्यायै जारः'[20] इति प्रयोगोऽस्ति । इदं वार्त्तिकं पदमञ्जर्यां खण्डितम्, तत्रोक्तम् – 'षष्ठ्यर्थे चतुर्थीति न वक्तव्यम्, योगविभात् सिद्धम्'[21] । अत्रायमाशयः 'चतुर्थ्यर्थे बहुलं छन्दसि' इति सूत्रे 'चतुर्थ्यर्थे' इत्यत्र चतुर्थ्याः अर्थः चतुर्थ्यर्थः तस्मिन् चतुर्थ्यर्थे इति षष्ठीतत्पुरुषसमासः। पदमञ्जरीकारमते अत्र समासः न कर्तव्यः अपितु 'चतुर्थी अर्थे' इति योगो विभक्तव्यः । एवञ्च तत्र षष्ठीत्यनुवर्तते एव । तेनायमर्थो जायते यत् अर्थे (स्वार्थे) षष्ठी भवति , चतुर्थी चेति । अत्र स्वार्थ एव षष्ठीचतुर्थ्योर्विधानमनर्थकमित्यन्योऽन्यसन्निधानादन्योऽन्यार्थे विभक्तिद्वयं विज्ञायते । अर्थात् एतेन योगविभागेनैव विभक्तिद्वयमपि अन्योऽन्यार्थे सिद्धमस्ति अतः अस्य वार्त्तिकस्यावश्यकता नास्तीति ज्ञातव्यम् ।

**सन्दर्भाः –**


1. वैयाकरणसिद्धान्तकौमुदी – सू. 231 , पृ. 231 , अ. 1\ 4 \18
2. वैयाकरणसिद्धान्तकौमुदी – सू. 1778, पृ. 525, अ. 5 \ 1 \ 115
3. वैयाकरणसिद्धान्तकौमुदी – सू. 29, पृ.39 अ. 1\4\14
4. वैयाकरणसिद्धान्तकौमुदी – सू. 230, पृ. 232, अ. 1\ 4\ 17
5. वैयाकरणसिद्धान्तकौमुदी –सू. 229, पृ. 232 , अ. 1\ 1\ 43
6. वैयाकरणसिद्धान्तकौमुदी –सू. 229, पृ. 232 , अ.1\4\17
7. वैयाकरणसिद्धान्तकौमुदी – सू. 232, पृ. 233, अ 1\ 4\ 1
8. वैयाकरणसिद्धान्तकौमुदी –सू. 175 , पृ. 168, अ. 1\ 4\ 2
9. वैयाकरणसिद्धान्तकौमुदी –सू. 179, पृ. 179 , अ.1\ 2\ 46
10. वैयाकरणसिद्धान्तकौमुदी (उमाशंकरशर्मा'ऋषिः')- पृ. 3
11. सुबोधिनीव्याख्या – पृ. 382
12. वैयाकरणसिद्धान्तकौमुदी (उमाशंकरशर्मा'ऋषिः')- पृ. 3
13. वैयाकरणसिद्धान्तकौमुदी – सू. 231 , पृ. 231 , अ. 1\ 4 \18
14. वैयाकरणसिद्धान्तकौमुदी (पञ्चोलीव्याख्या) – पृ. 375
15. वैयाकरणसिद्धान्तकौमुदी- सू. 226, पृ. 237,अ. 8/2/ 7
16. वैयाकरणसिद्धान्तकौमुदी –सू. 234, पृ. 234 , अ.6/ 4 /134
17. वैयाकरणसिद्धान्तकौमुदी –सू. 3453, पृ. 401 , अ. 4 /3 /105
18. वैयाकरणसिद्धान्तकौमुदी –सू. 1523, पृ. 445 , अ. 4/ 3/ 143
19. काशिकावृत्तिः – पृ . 525
20. काशिकावृत्तिः – पृ. 222
21. काशिकावृत्तिः(पदमञ्जरी)- पृ. 222 .


**गवेषिका राष्ट्रियसंसकृतसंस्थानम्, क.जे. सोमैया संस्कृतविद्यापीठम्**

# ।। श्रीमद्देवीभागवतमहापुराणे शिवतत्त्वान्वेषणम् ।।

✍ मौनिका बोल्ला

परम्पराक्रममागतश्रुतिस्मृतितन्त्रादिनिखिलानवद्यहृद्यप्रतिपद्यमानाध्यात्मिकविद्याधारायां शिव-तत्त्वविवेचनं नितरां शिवतत्त्वप्रीतिभाजां मनस्तोषमुपजनयति । तच्च श्रुतिषु स्मृतिषु रुद्रयामलाद्यागमेषु पुराणेषु अन्यत्र च संस्कृतवाङ्मये बहुधा विवेचितम् । तत्र बादरायणव्यासस्याष्टादशपुराणेष्वन्यतमे श्रीमद्देवीभागवतमहापुराणे यद्यपि देव्या एव वर्णनं प्रामुख्येण विहितम्, तथापि तत्र तत्र शिवतत्त्वस्यापि निरूपणमनितरसाधारणप्रकारेण कृतमिति पुराणपर्यालोचकानां न तिरोहितं वचः । भगवतः शिवस्य नैकानि रूपाणि पुराणेऽस्मिन् विवेचितानि । तद्यथा –

- **शिवस्य सन्तानप्रदातृत्त्वम्, महादेवत्त्वम्, सदाशिवत्वञ्च -**

प्रथमस्कन्धस्य दशमाध्याये व्यासे पुत्रलाभार्थमनुष्ठानचिकीर्षया पर्वतं गते सति तेन कस्य देवस्य आराधनेन शुकः उत्पादित इति ऋषिभिर्जिज्ञासिते सूतवचनमिदम्-

अतिष्ठत्स गताहारः शतसंवत्सरं प्रभुः । आराधयन्महादेवं तथैव च सदाशिवम् ।।[1] इति ।।

अत्र शिवस्य सन्तानप्रदातृत्वेन सह महादेवत्वं सदाशिवत्वञ्चापि प्रतिपादितम् । शिवशब्दः भद्रवचनः, 'स्वश्रेयसं शिवं भद्रम्' इत्यमरकोशात् । शिवाः भद्राः सर्वज्ञत्वादयो गुणा अस्य सन्तीति शिवः । अर्श आदेराकृतिगणत्वादच्प्रत्ययः[2] । यद्यपि परमशिवस्य निष्कलत्वाद्गुणाः न भवन्ति 'निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्' इति श्रुतेः, तथापि 'सृष्ट्यर्थं सर्वतत्त्वानां लोकस्योत्पत्तिकारणत्वाच्छिवेऽपि गुणाः स्वीक्रियन्ते । अथवा शिवः स्वयमेव शिवः शोभनत्वात् । शोभनत्वञ्च सर्वजीवनिवृत्त्याणवककार्मणमायेयाख्यानादिमलत्रयाभावरूपनैर्मल्यलक्षणं शुद्धत्वम् । अणुर्जीवः तस्यानादिजीवनापादकः अविद्यासम्बन्धः आणवं मलम्, अनादिकर्मफलवासनारूपं कार्मणं मलम्, अस्ति प्रकाशते इति व्यवहारसामग्र्यां सत्यां नास्ति न प्रकाशते इति व्यवहारयोग्यत्वरूपमावरणं मायियं मलम् । तादृशमलत्रयाभावः परमात्मनि सर्वज्ञे सम्भवतीति निर्मलता । यथोक्तं वायुसंहितायाम् - 'अथवाशेषकल्याणगुणैकघन ईश्वरः । शिव इत्युच्यते सद्भिः शिवतत्वार्थवेदिभिः ।।' इति । अथवा शेतेऽस्मिन् प्रलयकाले जगदिति शिवः । सदा सर्वकालेषु वर्त्तमानः शिवः सदाशिवः । ननु किं कादाचित्कोऽपि शिवो भवति यद्व्यावृत्तये सदेति विशेषणम् , विशेषणस्येतरव्यावर्त्तकत्वादिति चेत् भवतीत्याह – तत्र ब्रह्मविष्णुरुद्रमहेश्वरमूर्त्तीनामुत्तरोत्तरचिरकालवर्त्तित्वेऽपि सदाशिवाख्यपञ्चममूर्त्यपेक्षया कादाचित्कीं रुद्रमूर्त्तिं व्यावर्त्तयितुं सदेति विशेषणोपादानम् । उक्तं चेदं शिवपुराणे सृष्टिप्रकरणे – 'केन मानेन कालेऽस्मिन्नायुः संख्या प्रवर्त्तते' इति पृच्छत ऋषीन् प्रति वायुना कालमानमुक्त्वा 'ब्रह्मा विष्णुदिने चैको विष्णू रुद्रदिने तथा । ईश्वरस्य दिने रुद्रः सदख्यस्य तथेश्वरः । साक्षाच्छिवस्य तत्संख्यस्तदा सोऽपि सदाशिवः । तस्मिन् साक्षाच्छिवेनैव कालात्मा संप्रवर्त्तितः' । इति । अस्यायमर्थः – नवसहस्रसवनानां ब्रह्मणः परमायुर्भवति । तादृशब्रह्मपरमायुर्विष्णोरेकदिनम् । तादृशविष्णुपरमायुः रुद्रस्यैकदिनम् । तादृशरुद्रपरमायुः सदाशिवस्यैकदिनम् । ततः तादृशसदाशिवस्य कालकृतपरिच्छेद एव नास्ति । तदेतदाह - 'कालावच्छेदयुक्तानां गुरूणामप्यसौ गुरुः । सर्वेषामेव सर्वेशः कालावच्छेदवर्जितः ।' इति । इत्येवमस्मिन् सन्तानप्रदातृत्वेन , महादेवत्वेन , सदाशिवत्वेन च रूपेण शिवतत्त्वं प्रतिपादितम् ।

- **शिवस्य रुद्रत्वम् -**

ततस्तपस्तप्तं व्यासतेज आलक्ष्येन्द्रः भयमवाप्नोत् , तं भयाक्रान्तं शचीपतिं दृष्ट्वा रुद्र उवाचेति श्रीमद्देवीभागवते रुद्रत्वरूपेण शिवतत्त्वं प्रतिपादितम् । तथा च पङ्क्तिः – उवाच भगवान् रुद्रो मघवन्तं तथास्थितम्[3] । इति । रोदयत्यन्तकाले सर्वमिति रुद्रः । 'रोदेर्णिलुक् च'[4] इत्युणादिसूत्रेण रुदेर्ण्यन्ताद्रकि णिलोपे चेदं रूपम् । इयं च व्युत्पत्तिः छान्दोग्ये - 'पुरुषो वाव यज्ञस्तस्य यानि चतुर्विंशतिवर्षाणि' इति खण्डे प्राणेषु रुद्रपदं प्रयुज्य रुद्रपदप्रवृत्तिनिमित्ताभावात् कथं रुद्रपदवाच्यता प्राणानामिति शङ्कायां तत्समर्थयमानया श्रुत्या प्रदर्शिता - 'प्राणा वाव रुद्राः एते हीदं सर्वं रोदयन्तीति रुद्रः' । पृषोदरादित्वाच्चायं साधुः । यथोक्तं वायवीयसंहितायाम् - 'रुद् दुःखं दुःखहेतुर्वा तद्द्रावयति यः प्रभुः रुद्र इत्युच्यते तस्माच्छिवः परमकारणमिति' । हरिवंशे च - 'रुद्रो देवो रोदनाद्द्रावणाच्चेति' । कुत्रचित् सूर्योऽपि रुद्र इत्यभिधीयते । तद्यथा लिङ्गपुराणे - 'सूर्यात्मा भगवान्देवः सर्वदेवविभूतिहः । रुद्र इत्युच्यते देवैर्भगवान्मुक्तिभुक्तिदः' इति । अस्मिन्पक्षे रुजं द्रावयतीति व्युत्पत्तिर्बोद्ध्या । 'आरोग्यं भास्करात्' इति वचनात् , आदित्यस्य रोगनिर्हारकत्वात् । महादेव इति । दीव्यतेर्देवः । पचादित्वात् 'इगुपधज्ञाप्रीकिरः कः'[5] इति इगुपधलक्षणस्य कस्यापवादो 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः'[6] इति अच्प्रत्ययः । जगत्सृष्ट्यादिक्रीडाशालीत्यर्थः । महाँश्चासौ देवः महादेवः । 'आन्महतः.[7]' इति आत्वम् । महत्त्वञ्च सकलपूज्यत्वाद्वा विभुत्वेन प्रमाणतो महत्वाद्वा । यथोक्तं साम्बपुराणे - 'पूज्यते यः सुरैः सर्वैर्महाँश्चैव प्रमाणतः । धातुमर्हति पूजायां महादेवस्ततः स्मृतः' इति । हरिवंशे तु महत्त्वं सर्वज्ञत्वात् सर्वरक्षकत्वाच्चेत्युक्तम् - 'सहस्राक्षोऽयुताक्षो वा सर्वतोक्ष इवेक्षते । यच्च विश्वं महत्पाति महादेवस्ततः स्मृतः ।' इति ।

- **शिवस्य शङ्करत्वम् -**

ततस्तृतीयस्कन्धस्य चतुर्थाध्याये - 'विष्णुश्च विस्मयाविष्टः शङ्करश्च तथा स्थितः[8]' इत्यत्र शङ्कर इत्युपात्तम् । शं कल्याणं करोतीति शंकरः । 'शमि धातोः सञ्ज्ञायाम्' इत्यच् प्रत्ययः । शिवंकर इत्यर्थः ।

- **शिवस्य सर्वेश्वरत्वम् -**

ततः पञ्चमस्कन्धस्य प्रथमाध्याये ब्रह्मविष्णुरुद्राणां उत्तरोत्तरभावेनोत्तमत्वम् इत्युक्त्वा शिवस्योत्तमत्वं प्रकटयन्नाह – 'स हि सर्वेश्वरो देवो विष्णोरपि च कारणम् । सुषुप्तस्थाननाथः स विष्णुना च प्रपूजितः ।' तदंशभूताः कृष्णाद्यास्तैः कथं न स पूज्यते[9] । इति । अत्र शिवः सर्वेश्वरत्वेन स्तुतः । 'ईश ऐश्वर्ये'[10] इति धातोः 'स्थेशभासपिसकसो वरच्[11]' इति कर्त्तरि वरच् प्रत्यये 'ईश्वरः' इति सिद्धम् । सर्वेषामीश्वरः सर्वेश्वरः । ननु स्वामीश्वराधिपति.[12] इति सूत्रेण षष्ठ्याः प्रतिपदविधानात् 'प्रतिपदविधाना षष्ठी न समस्यते' इति निषेधात् कथं समास इति चेत्, न चेयं प्रतिपदविधाना षष्ठी, किं तु शेषषष्ठ्येव । परं प्रतिपदविहितया सप्तम्या इयं मा बाधीदिति । शेषषष्ठ्येव 'स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्चे'त्यत्र चकारेणानुज्ञायते । तत्रैव 'मूलरुद्रस्यांशभूतो रुद्रनामा द्वितीयकः ।।[13]'इति । सर्वरुद्राणां कारणभूतत्वात् 'मूलरुद्रः' इत्यभिहितम् । मूलरुद्रः सर्वेश्वर इत्यर्थः ।

- **शिवस्य दौत्यम्, पञ्चास्यत्वम्, देवदेवत्वम्, कामारित्वञ्च -**

पुनः पञ्चमस्कन्ध एव अष्टाविंशाध्याये रक्तबीजवधानन्तरं देव्या भगवान् शिवः शुम्भनिशुम्भौ प्रति दूतत्वेन प्रेषितः । तद्यथा – 'घोररूपाथ पञ्चास्यमित्युवाच स्मितानन । देवदेव व्रजाशु त्वं दैत्यानामधिपं प्रति ।।' 'दूतत्वं कुरु कामारे ब्रूहि शुम्भं स्मराकुलम् । निशुम्भञ्च मदोत्सिक्तं वचनान्मम शङ्कर ।।[14]' इति । अस्मिन् 'पञ्चास्यत्वम्' 'देवदेवत्वम्' 'दूतत्वम्' 'कामारित्वम्' इति शिवस्य चत्वारि तत्वानि प्रतिपादितानि । अस्यते ग्रासोऽस्मिन् इति

ISSN – 2349-3100

व्युत्पत्तौ 'असु क्षेपणे[15]' धातोः, कृत्यल्युटो बहुलमिति ण्यत् । मुखमित्यर्थः । पञ्चानि आस्यानि यस्य स पञ्चास्यः । तथोक्तम् – देवीपुराणे –शिवस्तत्र स्थितः साक्षात् सर्वपापहरः शुभः । स तु पञ्चमुखः ख्यातो लोके सर्वार्थसाधकः ।। पश्चिमे तु मुखे सद्यो वामदेवस्तथोत्तरे । पूर्वे तत्पुरुषं विद्यादघोरश्चापि दक्षिणे । ईशानः पञ्चमो मध्ये सर्वेषामुपरि स्थितः । एते पञ्च मुखा वत्म! पापघ्ना ग्रहनाशनः ।। इति ।। कामस्य मन्मथस्य अरिः ( निग्राहकः ) कामारिः । अनेन वैराग्याख्यं द्वितीयमव्ययं सूचितम् । यद्वा कामः कामना अरिर्यस्य , यत्प्राप्तौ विरोधिनी कामना स कामारित्यर्थः । यथोक्तं शिवपुराणे - 'फलोद्देशेन देवेशि लघुर्मयि समाश्रयः । फलार्थी तदभावे मां परित्यक्तुं क्षमो यतः' इति । कौर्मेऽपि ईश्वरगीतायाम् - 'त्यक्त्वा पुत्रादिषु स्नेहं विशोको निष्परिग्रहः । यावज्जीवं विरक्तः सँल्लिङ्गः एवार्चयेच्छिवम् ।। इत्यादि ।'

- **लक्ष्मिस्तुताः शिवस्य विविधस्वरूपाः -**

ततः षष्ठस्कन्धे श्रीविष्णुना लक्ष्मी शप्ता सती शिवमित्थमस्तुवत् –

'तत्र स्थिता महादेवं शङ्करं वाञ्छितप्रदम् । दध्यौ चैकेन मनसा शूलिनं चन्द्रशेखरम् ।।'

पञ्चाननं दशभुजं गौरीदेहार्धधारिणम् । कर्पूरगौरदेहाभं नीलकण्ठं त्रिलोचनम् ।।

'व्याघ्राजिनधरं देवं गजचर्मोत्तरीयकम् । कपालमालाकलितं नागयज्ञोपवीतिनम् ।।'

'ततस्तुष्टो महादेवो वृषारूढस्त्रिलोचनः । प्रत्यक्षोऽभून्महेशानः पार्वतीसहितः प्रभुः ।।[16]' इति ।

अत्र शिवः शूली, चन्द्रशेखरः, पञ्चाननः, दशभुजः, गौरीदेहार्धधारी, कर्पूरगौरदेहाभः, नीलकण्ठः, त्रिलोचनः, व्याघ्राजिनधरः, गजचर्मोत्तरीयकः, कपालमालकलितः, नागयज्ञोपवीती, वृषारूढः, त्रिलोचनः इति नामभिः स्तुतः । नीलकण्ठः इत्यत्र नैल्यं हालाहलप्रयुक्तं इन्द्रकृतवज्रप्रहारप्रयुक्तञ्चेति द्विधम् । यथोक्तं हरिवंशे - 'दत्तः प्रहारः कुलिशेन पूर्वं तवेशानामरराज्ञातिवीर्य । कण्ठे नैल्यं तेन ते यत्प्रवृत्तं तस्मात्ख्यातस्त्वं नीलकण्ठोऽतिकायः' इति । एतेनामोघं वज्रमपि नैल्यमात्रहेतुरासीदिति बलशालिता हालाहलपानेन च भक्तवत्सलता वा सूचिता ।

- **शिवस्य विशिष्टयोद्धृत्वं, तत्त्वज्ञानविशारदत्वं, शम्भुपदवाच्यत्वञ्च -**

ततः नवमस्कन्धे दानवेन शङ्कचूडेन सह युद्धे विशिष्टयोद्धृत्वम् , तत्त्वज्ञानविशारदत्वञ्च प्रतिपादितम् । यथा –

**'शिवतत्त्वं समाकर्ण्य तत्त्वज्ञानविशारदः ।**

**ययौ स्वयं च समरे स्वगणैः सह नारद ।।**[17] ' इति ।

तत्रैव द्वादशे श्लोके - अथ शम्भुर्हरेः शूलं जग्राह दानवं प्रती[18]ति । शिवस्य शम्भुत्वमुक्तम् । शमित्यव्ययं सुखवाचि । शं सुखं भावयति उत्पादयतीति शम्भुः । 'मितद्र्वादिभ्य उपसङ्ख्यानम्' इति कर्त्तरि डुप्रत्ययः । यद्वा भवतिरयं प्राप्त्यर्थः । शं भवति प्राप्नोतीति शम्भुः । आनन्दवानित्यर्थः । 'आनन्दवानयं ब्रह्मणो रूपम्' इति श्रुतेः । अथवा शम् अर्थात् सुखस्वरूपः सन् भवति अर्थात् सत्ताश्रयो भवति इति शम्भुः । 'सत्यं ज्ञानमनन्तं ब्रह्म ' इति श्रुतेश्च ।

- **शिवस्य नानाधर्मवत्त्वम् -**

ततः दशमस्कन्धस्य चतुर्थाध्याये विन्ध्यपर्वतस्य वृद्धिं रुणद्धिवति प्रार्थयमानाः महेन्द्रादयो देवताः शिवं तुष्टुवुः । तत्र शंकरः गिरीशत्वेन , गणाध्यक्षत्वेन, उमाललितपङ्कजत्वेन, सिद्धिदातृत्वेन, परमात्मत्वेन, वृषांकत्वेन, अमरेशत्वेन, कैलासवासित्वेन, अहिर्बुध्न्यत्वेन, मान्यत्वेन, मनुत्वेन, मानदातृत्वेन, अजत्वेन, बहुरूपत्वेन,

स्वात्मारामत्वेन, गणनाथत्वेन, विष्णुहृत्कञ्जवासित्वेन, महायोगित्वेन, योगीशत्वेन, दयासागरमूर्त्तित्वेन, आर्त्तिप्रशामकत्वेन, उग्रवीर्यत्वेन, गुणमूर्त्तित्वेन, वृषध्वजत्वेन, कालत्वेन, कालकालत्वेन च स्तुतः[19]।

- **श्रीमद्देवीभागवते हरिहरयोरभेदत्वम् -**

हरिहरयोर्भेदं मन्वानैरिदमत्र विज्ञेयम्, यन्नास्ति हरिहरयोः परस्परं कोऽपि भेदः । तत्र षष्ठस्कन्धे स्तुवन्तीं हरिप्रियां शम्भुरित्थं पप्रच्छ –

**किं तपस्यति कल्याणि जगन्मातर्वदस्व मे । सर्वार्थदः पतिस्तेऽस्ति सर्वलोकविधायकः ।।**
**हरिं त्यक्त्वाद्य मां कस्मात्स्तौषि देवि जगत्पतिम् ।[20] इति**

ततो लक्ष्मीरुवाच -

**तव तस्य द्विधा भावो नास्ति नूनं कदाचन । यस्त्वं योऽसौ पुनर्योऽसौ स त्वं नास्त्यत्र संशयः ।।**
**एकत्वञ्च मया ज्ञात्वा मया ते स्मरणं कृतम् ।।[21] इति ।।**

एतेन हरिहरौ न हि पृथक् – पृथक् स्तः । अपितु यो हरिः स एव हरः , यश्च हरः स एव हरिरिति अनेन पुराणपर्यालोचनेन विज्ञायते ।

**सन्दर्भाः –**


1. श्रीमद्देवीभागवतमहापुराणम्, 1-10-7
2. अर्श आदिभ्योऽच् , पा.अ. 5-2-127
3. श्रीमद्देवीभागवतमहापुराणम्, 1-10-14
4. उणादिसूत्रपाठः, 2-22
5. पाणिनीयाष्टाध्यायी, 3-1-135
6. नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः, पा.अ. 3-1-134
7. पाणिनीयाष्टाध्यायी, 6-3-46
8. श्रीमद्देवीभागवतमहापुराणम्, 3-4-22
9. श्रीमद्देवीभागवतमहापुराणम्, 5-1-21,22
10. धातुसूत्रपाठः, अदादिगणः,10
11. पाणिनीयाष्टाध्यायी, 6-3-46
12. तदेव, 2-3-39
13. श्रीमद्देवीभागवतमहापुराणम्, 5-1-26
14. तदेव, 5-28-35,36
15. धातुसूत्रपाठः, दिवादिगणः, 99
16. श्रीमद्देवीभागवतमहापुराणम्, 6-18-13,14,15,18
17. तदेव, 9-23-11
18. तदेव, 9-23-12
19. तदेव, 10-4-3,4,5,6,7,8,9
20. श्रीमद्देवीभागवतमहापुराणम्,6-18-20,21
21. श्रीमद्देवीभागवतमहापुराणम्, 6-18-30-31-32


**गवेषिका,व्याकरणविभागः, राष्ट्रियसंस्कृतसंस्थानम्, क.जे सोमैयासंस्कृतविद्यापीठम्, मुम्बई**

 ISSN – 2349-3100

# परिभाषेन्दुशेखरोक्तानुबन्धविचारः

✍डा.नवीनकुमारमिश्रः

परिभाषेन्दुशेखरे नागेशः अनुबन्धविषये पञ्चपरिभाषामपीपठत् । तथाहि अनुबन्धाः अनेकान्ताः, एकान्तः,नानुबन्धकृतमनेकाल्त्वम्,नानुबन्धकृतमनेजनतत्वम्,नानुबन्धकृतमसारूप्यम् इत्यादयः परिभाषाःपठिताः । तत्रस्थितमनुबन्धविषयं विचारयामि ।

इत्संज्ञकत्वमनुबन्धत्वम् इत्संज्ञायोग्यत्वमनुबन्धत्वम् । उपदेशेऽजनुनासिकः,हलन्त्यम् अनयोः सूत्रद्वयोरधीनः इत्पदार्थः उपदेशदशायाम् अज्झलानाम् इत्संज्ञा स्युरिति । तत्र को नामुपदेशः? उपदेशः आद्योच्चारणम् । ते च के ? इति प्रश्ने उच्यते-

**धातुसूत्रगणोणादिवाक्यलिङ्गानुशासनम् ।**
**आगमप्रत्ययादेशाः उपदेशाः नव प्रकीर्तिताः ।।** पा.शि.

एतेषां सर्वेषाम् उपदेशानाम् आभ्यां सूत्राभ्याम् इत्संज्ञाविहिता वर्त्तते चतुर्दशसूत्र्यां पञ्चदशानुबन्धवर्णाः विद्यन्ते । अनुबन्धः अवयवोऽनवयवो वेति प्रसङ्गे श्रीनागेशः स्वग्रन्थे एवमकथयत्**- अनेकान्ताः अनुबन्धाः ।**

ननु **गुप्तिज्किद्भ्यः सन्** इति सूत्रघटक सनः नकारः विधेये दृश्यते किन्तु जुगुप्सते नकारबोधकानवयवत्वम् सकारे बोधकावयवत्वम् । अत्र विरुद्धकोटिधर्मद्वयावगाहि ज्ञानेन संदेहोत्पद्यते तत्र एकतरपक्षसम्पादनाय अत्र परार्थानुमानवाक्यसमाश्रयणीयम् । तत्र पञ्चावयववाक्यम् अनुबन्धा अनेकान्ताः इति **प्रतिज्ञा**, यो हि अवयवः स कदाचित् तत्रोपलभ्यत एव **उदाहरणम्,** तदर्थभूते विधेये कदाप्यदर्शनात् **हेतुः** अयन्तु न तथा **उपनय**,अनुबन्धाः अनेकान्त इति **निगमनम्** । अनेन अनुमानेन अनुबन्धानामनवयवत्वसिद्धिः । तत्र जिज्ञासेयमुत्पद्यते यत् अनुमितौ साध्यसंशयरूपी पक्षता कारणम् ।

अनुबन्धाः अनेकान्त इति अनुमितौ साध्यः । अनुबन्धाः अनवयवाः अनवयवत्वाभाववन्तो वा । अतः उच्यते अनुमानवाक्ये यदि अनुबन्धः अवयवः तर्हि लक्ष्ये प्रयोगे वा तस्येत्संज्ञकस्य अनुबन्धवर्णस्यावश्यं दर्शनं स्यात् । सनः नकारः अनवयवः प्रयोगे लक्ष्ये वा दर्शनाभावात् । एवमेव शपः शकार लक्ष्ये भवतीत्यादौ शकारः अकारेण सह न दृश्यते । अनवयवत्वात् शप्प्रत्ययः शिन्न,**त्रसिगृधि धृषि क्षिपेः क्नुः** इति सूत्रस्थ क्नुः प्रत्ययस्थ ककारः अनवयवः कित्कार्यमसम्भवः । कित्वसम्पादनाय उच्यते-शक्तित्यादौ 'स्वसमीपोच्चरिते अनुबन्धे स्वनिरुपितमवयवत्वमारोप्यते'अनेन नियमेन शबादौ अवयवत्वसिद्धिः, वुञ्छणकठेत्यादावपि अवयवत्वारोपे णकारः छणः अवयवः नान्यस्य ककारस्येति ।

यथा **प्रमाणे द्वयसज्दघ्नञ्मात्रचः** इति सूत्रेऽपि स्वसमीपोच्चरितेनैव द्वयसचः चकारः दघ्नस्यापि अवयवत्वमापद्यते तर्हि उभयत्र चकारद्वयव्यर्थःस्यात् । चकारद्वयेन ज्ञायते यत् चकारानुबन्धात् पूर्वस्थितप्रत्ययस्यावयवत्वारोपः न तु मात्रचादीनाम् । अतः मात्रचादौ चकारः सार्थकः एव ।

किञ्च हलन्त्यमिति सूत्रे अन्त्यशब्दः अन्त्यावयवार्थपरः । तेन अन्त्यावयवस्येत्संज्ञा । दीक्षितस्तु अन्त्यशब्दः परसमीपबोधकः, तेन वुञ्छणादौ न दोषः । अवयवत्वारोपः शिदादिषु परिभाषेयं स्वीकारे नानुबन्धकृतमनेजन्त-प्रभृतिभ्यः तिस्रः परिभाषाः व्यर्थाः भवन्ति । तिसृणां परिभाषाणां स्वीकाराभावे लाघवेऽपि गौरवापत्तिः स्यात् । तद्यथा-

1.शिदादिषु(शित्,कित्,णित्) समाससम्पादनाय 'स्वसमीपोच्चरिते अनुबन्धे स्वनिरुपितमवयवत्वमारोप्यते' अयमारोपः स्वीकर्तव्य एव ।

2. सन्प्रत्ययः नकारदीनामनवयवत्वात् तद्धटित विभक्तिनिर्देशः न स्यात् । अतः सनि विभक्तिनिर्देशः सौत्रत्वात् परिकल्पयेत् ।

3.आदिशब्दस्य पूर्वसमीपे एवं हलन्त्यम् इत्यादौ अन्त्यशब्दस्य परसमीपे लक्षणा कर्तव्या ।

4.'आनङ् ऋतो द्वन्द्वे' इति सूत्रेण विधेये आनः नकारविधेयेन सह प्रयोगे लक्ष्ये वा कदापि नोपलभ्यते । यथा-मातापितरौ इत्यादौ अकारमात्रमेव दृश्यते आनङः नकारस्य विधेये

कदाप्यदर्शनात् । साध्याभावाधधिकरणे हेतुत्वे व्यभिचारः । तिसृणां परिभाषाणां प्रत्याख्याने अल्पाः गुणाः नैके दोषाः इति विज्ञाय ग्रन्थकारः पठति- वस्तुतस्तु एकान्ताः इत्येव न्याय्यम् ।

सनः विधेये बोधकत्वेन अनुबन्ध नकारस्य लाभ अन्यत्रानुपलम्भाच्च । तेन ज्ञायते यदनुबन्धः बोधकस्य सनः अवयवः इति **गुप्तिज्किद्भ्यः सन्** सूत्रे सन्बोधकः,जुगुप्सते इति लक्ष्ये सकारः बोध्यः ।

सना सह नकारः दृश्यते लक्ष्ये अन्यत्र न दृशयते । अतः नकारः सनः बोधकावयव बोध्यस्य लक्ष्यस्य अवयवो न । अत्रेत्थमनुमानवाक्यम्-अनुबन्धाः बोधकावयवाःबोधके उपलम्भात् अन्यत्रानुपलम्भाच्च ।

व्यतिरेकेण प्रमाणीक्रियते यत् गृहवृक्षादौ काकः एकजातीयसम्बन्धेन तिष्ठति । अनुबन्ध एकजातीयेन विधेयेन बोधकेन सह तिष्ठति न तु बोधकभिन्ने । अयमाशयः काकः गृहवृक्षादौ संयोगसम्बन्धेन तिष्ठति अयं न तथा सनः नकारस्तु सूत्रस्थ सन्बोधकेन सह समवायसम्बन्धेन तिष्ठति न त्वन्यत्र । अतः यो हि योनोपलभ्यते एकजातीयसम्बन्धेन अन्यत्रानुपलम्भाच्च । सः तस्य सनः विधेयस्य बोधकस्य वा अवयवः भवति । अनेन अनुबन्धस्य अवयवत्वं सिद्ध्यति । अनुबन्धानां बोधकावयवस्वीकारे शित्कित्यादौ शकारः अवयव इत् यस्यासौ शिदिति बहुव्रीहिसमास अनारोपेणैव सेत्स्यति,किन्तु अ नेकान्ताः अनुबन्धा इति परिभाषास्वीकारात् बहुव्रीहिसमाससम्पादनाय अनुबन्धेऽवयवत्वारोपः,हलन्त्यमिति सूत्रे अन्त्यशब्दस्यपरसमीपे एवं चूटू इति सूत्रे आदिशब्दस्य पूर्वसमीपे लक्षणा स्वीकर्तव्या तत्तु एकान्तपक्षे न कर्तव्यम् । एवं हि अनुबन्धानामनवयवत्वपक्षे णकारादीनां नेत्संज्ञा, लशक्वतद्धिते,चुटू इत्यादौ आद्यावयवस्यैवेत्संज्ञात्वात् । अवयवत्वारोपे तु दघ्नचः चकारः व्यर्थः स्यादित्यपेक्षया एकान्त एव सिद्धान्भूतः।

ननु अनुबन्धानामनेकाल्त्वादेव **अष्टाभ्य औश्** सूत्रविहितस्य सर्वादेशे कृते **अष्टौ** इति रूपं सिद्ध्यति तर्हि सर्वादेशाय अनेकाल्सूत्रे शिद्ग्रहणं व्यर्थं स्यात् । शिद्ग्रहणं व्यर्थीभूयेमां परिभाषां विज्ञापयति **नानुबन्धकृतमनेकाल्त्वम्** इति । अनुबन्धानामवयवत्वेऽपि तदाधारीकृत्य नानेकाल्त्वमिति । अनेकाल्सूत्रस्थ शिद्ग्रहणमेवास्याः ज्ञापकम् । लुटः प्रथमस्य डारौ रसःइत्यादि सूत्रविहित डा इत्यस्य जशः शी इत्यनेन शीत्यस्य एवं सुपां सुलुक0 इति सूत्रविहितः शे इत्यादीनां कथं सर्वादेशत्वं संभवति ? डादयस्तु प्रत्ययादधिकारादतिरिक्तत्वात् चुटू एत्यनेन डादीनां नेत्संज्ञा । अतएव अवर्णस्त्रसावनञः इति सूत्रेण नञा रहितस्यार्वन्नित्यस्याङ्गस्य **तृ** इत्यन्तादेशो न तु सौ उगिन्नुमि कृते अर्वन्तौ . अर्वन्तः इति । **इत्संज्ञकत्वमनुबन्धत्वम्** इति लक्षणात् इत्संज्ञाभावात् प्रकृतपरिभाषायाः अप्रवृत्तौ डादीनामने-काल्त्वमपपन्नम् तत्फलं दुर्वारः भविता इत्यादौ अनेकाल्त्वात् सर्वादेशे डा इति रूपापत्तिः। तन्निवारणाय नव्यमते अनुबन्धलक्षणं पठितम्- **इत्संज्ञायोग्यत्वमनुबन्धत्वम्** इति । तेन डादौ तु न सर्वादेशः एवं शी तथा शे इत्यादिषु शित्वात् सर्वादेशः विधेयः।

न च व्याघ्रपादित्यादौ विहितो लोप: सर्वादेशो माभूदिति हेतो: बोध्यवृत्यनेकाल्त्वमेव सर्वादेशताप्रयोजकं न बोधकवृत्तीति स्वीकार: आवश्यक: । तथा चानुबन्धविनिर्मुक्तपदार्थोपस्थित्या अष्टाभ्य औश् ७/१/२१ इत्यादौ बोध्यस्य औकारस्यानेकाल्त्वाभावेन सर्वादेशाय शिद्ग्रहणस्य चारितार्थ्याज्ज्ञापकत्वासम्भव इति वाच्यम् आनुमानिकस्थान्यादेशभावकल्पनेनानेकाल्त्वात्सर्वादेशसिद्धेः । एवञ्च शिद्ग्रहणस्य ज्ञापकत्वं निर्बाधम् अत एवार्वन्तौ अर्वन्तं इत्यादौ अर्वणस्त्रसावनञ: ६/४/१२७ इति आदेशो न सर्वस्य स्थाने । न चैवं डादेश: णलादेशश्च सर्वस्य स्थाने न स्यात्, तथा च भविता बभूवेत्याद्यसिद्धिरिति वाच्यम्, सर्वादेशत्वं विना प्रत्ययादित्वाभावेन चुटू १/३/७ इत्यादेरप्रवृत्याडादीनाम-नुबन्धत्वाभावेन परिभाषाया अप्रवृत्त्या आनुपूर्व्यात्सर्वादेशसिद्धेः । एतन्मतेन इत्संज्ञावत्त्वमनु-बन्धत्वमिति स्वीक्रियते । यदि सर्वादिगणोक्तशेखरग्रन्थमनुसृत्येत्संज्ञायोग्यत्वमनु-बन्धत्व-मित्युच्यते तदा डादिविषये डा + आ, ण + अल् इति प्रश्लेषेण सर्वादेशत्वं संसाधनीयम् । अत्र मते सर्वादेशत्वमित्यस्य सिद्धमित्यनेनान्वय: । अभावेनेत्यस्य च विना शब्देन । एवशब्दश्चाप्यर्थक: तस्य च विनाशब्दादनन्तरमन्वय: । तथा चानुबन्धत्वस्याभावेन विनापि अर्थादित्संज्ञा-योग्यतयानुबन्धत्वेन परिभाषाप्रवृत्यापि आ आ इत्यानुपूर्व्यात् सर्वादेशत्वं सिद्धमिति । अनुबन्धस्यावयवत्वस्वीकारे दोषः प्रदर्श्यते-दैप् शोधने इत्यस्माद्धातोः पकारान्तात् **आदेचः उपदेशेऽशिति** इति सूत्रेण एजन्तत्वाभावे आत्वभावः । यदि प्रकारान्तरेण औपदेशिकात्वग्रहणे सति पलोपानन्तरे दास्वाभावात् **दाधा घ्वदाबिति** सूत्रेण घुसंज्ञायाम् **अचः उपसर्गात्तः** इति सूत्रेण अकारस्य स्थाने तकारादेशे अवादीनामुपसर्गप्रतिरूपकत्वात् अवदत्तमित्येव सिद्धिः न तु अवदातम् । अतः दैप्धातौ एजन्तत्वसम्पादनाय परिभाषा पठिता **नानुबन्धकृतमनेजमन्तत्वमिति** –अनुबन्धप्रभावेण धातोरेजन्तत्वस्य न नाशः इति नियमात् एजन्तत्वे अवदातम् सिद्ध्यति । अतः एजन्तादिप्रसङ्गेऽनुबन्धानामनवयवत्वं ग्राह्यम् । ज्ञापकसिद्धेयमे . **उदीचां**

**माङो व्यतीहारे** इति सूत्रे माङः मेङ् कृतात्वनिर्देशः ज्ञापकः । **आदेचः उपदेशेऽशिति** इति सूत्रेण एजन्तस्यात्वविधानात् मेङि अनेजन्तत्वादात्व-निर्देशाल्लाभरिति । अनुबन्धानामवयवत्वे **वाऽसरूपोऽस्त्रियाम्** इति सूत्रेण गोदः, गोदाय इत्यादौ काणयोः प्रत्यययोः वैकल्पिकव्यवस्थायां प्रयोगापत्तिः **नानुबन्धकृतमसारूप्यम् –**प्रत्ययादिविषये अनुबन्धप्रयुक्तप्रत्ययाः न स्वीक्रियन्ते इति । अत्र ज्ञापकः ददातिदधात्योर्विभाषा इति सूत्रेण णबाधकशस्य विकल्पेन विधानम् । नो चेत् शणयोरसारूप्यात् स्वत एव विकल्पेन बाधे सिद्धे विकल्पविधानं निष्फलम् ।यथा- काणयोः नित्यबाध्यबाधकभावेति । नानुबन्धकृतमनेकाल्त्वम् इति परिभाषास्वीकारे अष्टावित्यत्र औशादेशः अनेकालत्वात् सर्वादिशे कृतेऽपि अनेकाल्सूत्रे शिद्ग्रहणं चरितार्थम् ।अनेकाल्सूत्रे शिद्ग्रहणस्य ज्ञापनात्अर्वन्तौ अर्वन्तं इत्यादौ अर्वणस्त्रसावनञ: ६/४/१२७ इति सर्वस्य स्थाने आदेशो न स्यादिति ।

न चैवं डादेश: णलादेशश्च सर्वस्य स्थाने न स्यात्, तथा च भविता बभूवेत्याद्यसिद्धिरिति वाच्यम् । अनुबन्धानामवयवत्वस्वीकारेऽनुबन्धघटितस्यैव बोधकत्वेन काणोरसरूपत्वाद् 'वाऽसरूपोऽस्त्रियाम्' ३/१/९४ इति विकल्पेन बाधात् गोद इत्यत्र कविषयेऽणप्यापद्येत । अनवयवत्वे तु न दोष:। तेन ककारं णकारं वाऽदाय काणोरसारूप्यं न सम्पादयितुं शक्यते । कणयोरसारूप्यात्स्वत एव विकल्पेन बाधे सिद्धेवाऽसरूपसूत्रे विकल्पविधानं व्यर्थं स्यात् । तेन 'गोद' इत्यादौ आतोऽनुपसर्गे क: ३/१/३ इति केन कर्मण्यण् ३/२/१ इति अणो नित्यं बाधो जायते । वाऽसरूपोऽस्त्रियाम् ३/२/९४ इति सूत्रे भाष्ये परिभाषेयमुपलभ्यते । तथाहि अथैकान्ते दोष एव? एकान्ते च न दोष: आचार्यप्रवृत्तिर्ज्ञापयति नानुबन्धकृतमसारूप्यं भवतीति यदयं ददातिदधात्येर्विभाषांशं शास्ति ।

**सन्दर्भग्रन्थसूची-**


१.वैयाकरणसिद्धानतकौमुदी (सञ्ज्ञाप्रकरणम् )

२.तस्य लोपःइति सूत्रभाष्यम्

३.वैयाकरणसिद्धान्तदिग्दर्शनम् परिभाषापटलम्

४.अष्टाध्यायी ( हलन्त्यम् , उपदेशेऽजनुनासिकः इत्)

५.परिभाषेन्दुशेखरः(गदाटीका)

६.लघुशब्देन्दुशेखरः(सञ्ज्ञाप्रकरणम् )

७. पाणिनीयशिक्षा 15-21

८. नागेशगूढार्थदीपिका पृ.सं. 43-52

९.काशिकावृत्तिः 1/3/3-1/3/9

१०. परिभाषेन्दुशेखरः(दुर्गाटीकासहितः)

११. वैयाकरणसिद्धानतकौमुदी,लक्ष्मीटीकासहितः

१२.अद्भूतधातुरूपावली पृ.सं.123-143

१३.प्रौढमनोरमा तस्य लोपःसूत्रम् शब्दरत्नसहितम्

१४.परिभाषापाठः

१५. वाऽसरूपोऽस्त्रियाम् सूत्रव्याख्या भैरवीटीकासहितः

१६.नारायणमिश्रकृतपरिभाषाप्रकाशः

१७. वैयाकरणसिद्धान्तकौमुदी (मूलम्) पृष्ठ सं. १३

१८.लौकिकन्यायकोषः पर्जन्यवन्न्यायः

१९.किरणावली अनुमानखण्डः


**व्याकरणविभागः, राष्ट्रियसंस्कृतसंस्थानम्, क.जे सोमैयासंस्कृतविद्यापीठम्, मुम्बई**

ISSN – 2349-3100

# फलप्रवचने प्रश्नशास्त्रस्य महत्त्वं वैशिष्ट्यञ्च

✍डा. केशव मिश्रः

फलात्मके होरास्कन्धे अस्त्येकं महत्त्वपूर्णमङ्गं प्रश्नशास्त्रम् इति। प्रश्नकर्त्तुः प्रश्नमाधारीकृत्य फलप्रवचनं क्रियते इति हेतोः अस्य शास्त्रस्य प्रश्नशास्त्रम् नाम। उदाहरणार्थं कोऽपि आगत्य एवं प्रकारेण प्रश्नं पृच्छति गृहं परित्यज्य गतो मम पुत्रः इदानीं कुत्र वर्तते० जीवति न वा० नूतनं स्थलं क्रयणीयं तत्समीचिनं वर्तते न वा० देवालये देवसान्निध्यं कुण्ठितं किमस्य कारणम्० एतादृशप्रसङ्गेषु नष्टवस्तुचिन्तायां चोरप्रश्ने च प्रश्नशास्त्रेणैव उत्तरं दातुं शक्यते न तु जातकेन। लोके फलनिरूपणे जातकप्रश्नयोः उभयोरपि आवश्यकता वर्तते।होराशास्त्रे तु जन्मकालेष्टघट्यादिकमधिकृत्य जन्मकुण्डलीनिर्माणस्य तच्चाधिकृत्य च फलकथनस्य सर्वा योजना विद्यते। परञ्च यस्य जन्मकालादिकस्य ज्ञानं पित्रोः प्रमादान्न भवेत्तेन कथं भविष्यत्ज्ञानं कार्यमिति तदर्थं ज्योतिर्विद्भिराचार्यैः प्रश्नशास्त्रस्याविष्कारः कृतः। अत एव ज्योतिषशास्त्रे जन्मकुण्डलीं विना तात्कालिकफलज्ञानार्थं त्रयः सिद्धान्ताः प्रचलन्ति- प्रश्नाक्षरसिद्धान्तः, प्रश्नलग्नसिद्धान्तः एवंस्वरविज्ञानसिद्धान्तः।वस्तुतः ज्यौतिषशास्त्रं मानवकल्याणार्थं रचना महर्षिभिर्विहिता। अत एव कश्चिच्छ्रद्धाभक्तियुतो मानवो दैवज्ञमुपयाति स्वकीयभविष्यत्ज्ञानार्थं परञ्च तेन स्वजन्मकालादिकं न ज्ञायते तदा तस्य कल्याणं कथं भवेदिति प्रयोजनार्थमेव प्रश्नशास्त्रम्। अत एवात्र पृच्छकस्यापि नियमाः प्रोक्ता यैर्नियमैस्तेन पत्रपुष्पादिकमादाय श्रद्धया दैवज्ञः प्रष्टव्य इत्यङ्कितम्। अत्र च पृच्छकस्य प्रश्नसमय एव जन्मकाल इति तमधिकृत्य सर्वं होराशास्त्रात्फलं प्रोक्तव्यमिति।

**प्रश्नशास्त्रस्वरूपम्—**

ज्योतिषशास्त्रे प्रश्नशास्त्रनामको भागो विस्तरेण प्रतिपादितः पृथक्त्वेन दृश्यते। प्रश्नः द्विधा भवति मानसिकः वाचिकः च । वाचिकप्रश्ने पृच्छकः यद् वदति तद् उक्तं दैवज्ञेनसह फलं प्रप्नोति। परन्तु मानसिके प्रश्ने पृच्छकः स्ववार्तां न कथयति केवलं प्रतीकरूपेण फल पुष्प-नदीनां द्वारा दैवज्ञः पृच्छकस्य मनः ज्ञात्वा फलं कथयति। कदाचित् पृच्छकः उपहासार्थं दैवज्ञस्य पार्श्वे प्रश्नं ज्ञातुम् आगच्छति तदर्थं प्रश्नलग्नस्य निर्माणं कृत्वावेव फलं वाच्यम्। पृच्छकारूढराशिं प्रश्नकालिकं लग्नं वा केन्द्रीकृत्य फलकथनं प्रश्नः इत्युच्यते। पृच्छकः तत्सम्बन्धिनो वा दैवज्ञस्य गृहमागत्य प्रथमं यदा प्रश्नस्य निवेदनं करोति सः समयः प्रश्नसमयः अथवा पृच्छा इत्युच्यते। प्रथम निवेदनं पृच्छा इत्यस्य लक्षणम्। प्रश्नफलानां निर्णये अस्य पृच्छाकालस्य अतीव महत्त्वं वर्तते। यतः शुभाशुभदेवेन बलात् सम्प्रेर्यमाणः पृच्छकः, प्रथमं दैवज्ञस्य समीपमागमिष्यति। अतः प्रथमनिवेदनस्यैव यादृच्छिकत्वम्। प्रथम निवेदनसमयस्य गुणदोषचिन्तनं, पृच्छादेशस्वरूपचिन्तनं, तात्कालिकप्रश्नैः गतिचिन्तनं, यादृच्छशकुनानां चिन्तनम् इत्यादयः बहवः अंशाः पृच्छासमयादेव दैवज्ञेन ज्ञातव्याः प्रश्नमार्गे इत्थं लिखितम्-

**दैवज्ञेन समाहितेन समयो देशः स्वावायुर्दशा, प्रष्टुः स्पर्शमाश्रितर्क्षहरितौ प्रश्नाक्षराणि स्थितिः। चेष्टा भावविलोकने च वसनाद्धन्यच्च तत्कालजं पृच्छायाः समये तदेतदखिलं ज्ञेयं हि वक्तुं फलम्**[1]।। जन्मदेशे जन्मसमये विद्यमानं ग्रहस्थितिमाधारीकृत्य दशान्तर्दशानुसारं फलनिरूपणं क्रियते जातके। किन्तु यस्य जन्मसमयः गर्भाधानसमयो वा न ज्ञायते दादृशस्य नष्टजातकस्य जनस्य जातकं, जातकविषयकप्रश्नकरणसमये उद्यन्तं लग्नराशिमाधारीकृत्यैव निर्णीयते। प्रायः प्रश्नभागस्य अङ्कुरः नष्टजातकस्य जनस्य जातकनिर्माणायैव प्राचीनकाले अभूद् इति। यतः बृहज्जातके **आधानजन्मापरिबोधकाले सम्पृच्छतां जन्म विलग्नाद्**[2] इत्युक्तमस्ति। सम्यक् पृच्छतां जन्म विलग्नाद् वदेदित्यर्थः। फलताम्बूलदक्षिणाभिः सम्यग् यदा स्वजातकविषये प्रश्नं करोति तदा तात्कालिकलग्नं ग्रहस्थितं च आधारीकृत्य प्रश्नकर्तुः जनस्य जन्मकालिकी ग्रहस्थितिः निर्णीयते। एवमेव प्रश्नशास्त्रेऽपि पृच्छाकालस्य प्रथमप्राशस्त्यमस्ति। पृच्छकस्य भाविफलानां नियन्त्रकः कालः यदा भवति तदानीमेव पृच्छकस्य प्रश्नकरणान्तः करणस्य उदयः भवतीति। अत एव अवशः शरीरी शुभाशुभदैवेन बलात् सम्प्रेर्यमाणः, दैवज्ञस्य समीपं गच्छतीति प्रश्नकालस्य यादृच्छिकत्वं निर्णीतमस्ति। यथा ईश्वरेच्छया मनुजन्म प्रप्नोति तथैव पृच्छकः दैवज्ञं प्रति शभाशुभं ज्ञातुं गच्छति। अत एव जन्मकालीनोदयलग्नवत् प्रष्टुः आरूढस्यापि प्रामाण्यमस्त्येव। एतदेव प्रश्नमार्गे उक्तमस्ति यथा- **सम्प्रेर्यमाणस्त्ववशः शरीरी प्रसह्य देवेन शुभाऽशुभेन। ज्योतिर्विदः सान्निधिमेति यस्मात् प्रश्नोऽप्यतो जन्मसमयः फलेषु**[3] ।। प्रश्नकरणसमयवशादेव पृष्टस्य विषयस्य निर्णयो भवति। यदि प्रश्नकाले चन्द्रहोरा, चन्द्रराश्युदयः, चन्द्रस्य उच्चस्थितिः चतुर्थभावाधिपस्य लग्नोपरिदृष्टिः एवमादयः अंशाः भवन्ति तर्हिः एषः मातृविषयकप्रश्नः इति निर्णयः। एवमेव रविश्चेत् पितृचिन्ता, कुजश्चेत् सहोदरचिन्ता, बुधश्चेत् वाक्चिन्ता, गुरुश्चेत् सन्तानचिन्ता, शुक्रश्चेत् भार्याचिन्तनम्, शनिश्चेत् भृत्यचिन्तनम् एवं क्रमेण निर्णेतुं शक्यते। दशमाधिपतिश्चेत् कर्मचिन्तनं पञ्चमाधिपतिश्चेत् पुत्रचिन्तनमित्यपि वक्तुं शक्यते। प्रश्ने जातके च आरूढनिर्णयं विहाय अन्येषु सर्वेष्वपि विषयेषु प्रायः व्यत्यासः नास्ति। ग्रहकारकत्वं, ग्रहस्थितिफलानि, योगदृष्ट्यादिफलानि च समानरूपाण्येव। देवचोरराजसन्तानविवाहादि-प्रश्नभेदेन भावेषु चिन्तनीयपदार्थाः भिद्यन्ते। भावेभ्यः शुभाशुभचिन्तनक्रमस्तु जातकोदितः एव। जातके समग्रे जीवने जायमानानि फलानि निर्दिष्यन्ते। किन्तु प्रश्ने तत्काले जायमानानि फलानि विशेषरूपेण चिन्त्यन्ते। यथा एकस्य शिशोः जननकालाद् ग्रहस्थितिविचारः तथा प्रश्नसमयादपि ग्रहस्थितिः चिन्तनीया। प्रश्नजातकस्य साधर्म्ये प्रश्नस्य काश्चित् विशेषताः भवन्ति। जातकं सम्पूर्णमानवजीवनसम्बद्धविषयः, प्रश्नस्तु तत्कालीनविषयः। **संवत्सरान्तर्गतं वर्तमानं वर्षस्यान्तः किल मुनिगदितम्**[4] इत्यादिप्रमाणैः प्रश्नोक्तफलानां संवत्सरान्तः विशेषरूपेण अनुभवः। जातके व्यक्तिमात्रमधिकृत्य फलनिरूपणं विद्यते। जन्मकालिकग्रहस्थितेः आधारेण फलनिरूपणं क्रियते। न तु तत्र पृच्छकमनः स्थितेः श्वासस्य तात्कालिकशकुनस्य च चिन्तावसरः । प्रारब्धकर्मवशात् शुभाशुभचिन्तनं जातके भवति। न तु जातके एतज्जन्मार्जितकर्मणां

चिन्तनम्। एतज्जन्मार्जितशुभाधिक्यात् प्रारब्धकर्मसम्बन्ध्यशुभफलानां लघुत्वं जायते। प्राणिनां जन्म वा पुनर्जन्म पूर्वार्जितशुभाशुभकर्मणां फलानुसारं भवति। शुभकर्मणां फलं तु स्वर्गप्राप्तिः। तत्रापि पुण्यकर्मक्षयेन अवशिष्टं फलं भोक्तुं पुनर्जन्म अपेक्ष्यते। उच्यते यथा-

**ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति।। एवं त्रयी धर्ममनुप्रपन्ना गतागतं कामकामा लभन्ते[5]।।**

अपि च **स्वर्गाद्यनुभवक्षीणशिष्टप्राचीनकर्मणाम्। भोगाय जननं नृणां मोहभाजां मुहुर्मुहुः[6]।।** यथोक्तं विपाक संहितायाम्- **कर्मणा नरकं सूतं स्वर्गं याति च कर्मणा। देवत्वं प्राप्नुयात् जीवो राक्षसत्वं च कर्मणा।। कर्मणा बन्धमायाति मोक्षमायाति कर्मणा । कर्मणा पतनोच्छ्रायो नृणां जन्मनि-जन्मनि[7]।।** इत्यनेन वचनेन स्पष्टं ज्ञायते यज्जातकाः स्वकर्मानुसारेण फलं प्राप्नोति। **कर्मणा बध्यन्ते जन्तुः विद्यया च विमुच्यते[8]।** अतः कर्म प्रधानम् । **सुखस्य दुःखस्य न कोऽपि दाता अहं करोमीति वृथाभिमानः। परो ददातीति कुबुद्धिरेषा स्वकर्मसूत्रग्रथितो हि लोकः[9]।।**

भारतीयेषु सर्वेष्वपि शास्त्रग्रन्थेषु मनोवाक्कायकृतं त्रिविधं कर्म अङ्गीकृतम्। यानि बीजानि भूमावुप्तान्नानि तान्येव वृक्षरूपेण भूत्वा परिणामे वृद्धिं गत्वा विविधानि फलानि यथा प्रदास्यन्ति, तथैव स्वकृतानि कर्माणि कालान्तरे तत्फलानुभवानुरूपविविधशरीरप्राप्तिकारणानि भूत्वा पक्वकाले (अनुभवसमये) सुखदुःखरूपाणि फलानि प्रदास्यन्ति। यथा वृक्षाणां कटूनि, तिक्तानि, आम्लानि, स्वादूनि, कषायाणि च फलानि भवन्ति तथैव कर्मफलान्यपि सुखरूपाणि दुःखरूपाणि च भवन्ति। तान्येव शुभाशुभभेदेन वक्ष्यन्ते। **ज्ञानाग्निः सर्वकर्माणि भस्मात् कुरुतेऽर्जुन[10]** प्रायशः मनुजः सुखानुभवायैव यतते न तु दुःखानुभवाय। विशेषतः दुःखं परिहर्तुञ्च प्रयतते। सुखं वा दुःखं वा आगमिष्यतीति ज्ञातुं कथं वा शक्यते इति प्रश्ने समुत्पन्ने तद्विषयकज्ञानाय महर्षिभिः कृतं ज्यौतिषशास्त्रम्। अस्मिन् शास्त्रे बहवो विषयाः शुभाशुभज्ञानाय प्रतिपादिताः। एतत् प्रश्नकर्म विना निर्णेतुं न शक्यते। अतः इदानीमनुभूयमानानां शुभाशुभफलानां कारणस्य निर्णयस्थानं प्रश्न एव भवेद् न तु जातकम्। पुनः पृच्छकेप्सितानां समेषां प्रशानानामुत्तरं जातकेन न लभ्यते। वस्तुतः शुभाशुभफलप्रवचनार्थं प्रश्नजातकयोः उभयोः चिन्तनमावश्यकम्। यदा गुणैः दोषैर्वा जातकतः प्रश्नो भिन्नो भवति तदा प्रश्नकालिकग्रहस्थितिवशादेव फलप्रवचनं कार्यम्। जातके गुणाधिके प्रश्नः दोषाधिकः। जातके दोषाधिके प्रश्नो गुणाधिकः इति द्विधा प्रश्नस्य जातकाद् भेदः स्यात्। जातके गुणाधिके प्रश्नो दोषाधिकश्चेत् एतज्जन्मार्जितशुभकर्मभ्यः अशुभफलं निर्दिशेत्। जातकं जातस्य पूर्वजन्मनि कृतानां पूर्वकर्माणां शुभाशुभपंक्तिं तमसि द्रव्याणि दीप इव व्यञ्जयति। अर्थात् पूर्वजन्मार्जितं शुभाशुभकर्मणां पंक्तिं जातके ग्रहाः सूचयन्तीति प्रश्नमार्गे उक्तमस्ति यथा-**पूर्वजन्मार्जितं कर्म शुभं वा यदि वाशुभम्। तस्य पंक्ति ग्रहाः सर्वे सूचयन्तीह जन्मनि[11]।।**

गतजन्मनि कृताणां पूर्वकर्मणां फलं खलु अस्मिन् जन्मनि अनुभवति अत्र प्रश्नशास्त्रस्य आवश्यकता का इति चेत् गतजन्मनि कृतानां कर्मणां कस्य कर्मणः पंक्तिम् इदानीम् अनुभवति तथा अस्मिन् जन्मनि कीदृशानि कर्माणि कृतानि इत्यपि ज्ञातुं प्रश्नशास्त्रेणैव शक्यते। इदानीं गतजन्मनि कृतानां कर्मणां फलम् अनुभवति अथवा अस्मिन् जन्मनि इहार्जितानां कृतानां कर्मणां फलं वा अनुभवतीति ज्ञातुं प्रश्नशास्त्रमेव शरणम्। यथोक्तम्-**यदा जातकतः प्रश्नो गुणदोषैर्विभिद्यते। तदा शुभाऽशुभं विद्यात् कर्मभेदैरिहार्जितैः।। यदानुसरति प्रश्नो जातकं ग्रहभादिभिः। तदा प्राक्कर्मविपाकः स्यादित्याद्यूह्यं हि धीमता[12] ।।** तत् कथमिति चेज्जातकानुसारं शुभकालः प्रश्नानुसारं अशुभः दृश्यते चेद् अस्मिन् जन्मनि कृतपापफलं इदानीम् अनुभवतीति ज्ञायते। एवं जातके अशुभं दृश्यते प्रश्नेऽपि अशुभं दृश्यते इति चेत् पूर्वजन्मार्जितपापफलम् इदानीम् अनुभवतीति ज्ञातव्यमस्माभिः। एवञ्चेत् प्रश्नस्य प्रसक्तिः का कुत्र इति चेद् यत्र ग्रहस्थित्या निरुपितफलानाम् अनुभावानाञ्च सामाञ्जस्यं न भवति तत्र प्रश्नः विधेयः । यथा-**आमरणादिह जन्तु प्राक्कृतनिजकर्मपाकमनुभवति। तद्वक्तुमलं जातकमथ किं प्रश्नेन कथ्यते सत्यम्[13] ।।** अपि च **कस्य पंक्तिरिति ज्ञातुमिदानीं पूर्वकर्मणाम्। इहार्जितं च विज्ञातुं कर्म प्रश्नो विधीयते[14] ।।**

जातकप्रश्नाभ्यां फलचिन्तने फलद्वयमपि कदाचिद् विरुद्धं स्यात्। जातकाद् गुणः, प्रश्नदोषः, एवञ्च प्रश्नाद्गुणः, जातकदोषश्च सूच्यते। अस्मिन् सन्दर्भे तदस्मिन् जन्मनि कृतशुभाशुभकर्मफल-मिति चिन्तनीयम्। ग्रहस्थित्या चन्द्रस्थितराश्यादिना प्रश्नः जातकतुल्यश्चेत् प्राक्जन्मार्जितकर्मविपा-केति मन्तव्यमिति। विषयेऽस्मिन् सर्वार्थचिन्तामणिकारेण निगदितं यत् फलादेशे यथा जन्मादेशः तथैव प्रश्नादेशोऽपि भवतीति**यज्जातके निगदितं भुवि मानवानां, तत्प्राश्निकेऽपि सकलं कथयन्ति तज्ज्ञाः।प्रश्नोऽपि जन्मसदृशो भवति प्रभेदः प्रश्नस्य चास्ति जननस्य न कश्चिदस्ति[15] ।।** एवमेव – **एवं जन्म खगोदयः फलमिदं सर्वं वदेज्जातके तन्नो चेदथ जन्मपत्रमपि वा तत्प्रश्नलग्नाद्वदेत्।**

**प्रश्नो जातकतुल्य एव न भवेद् भेदोथऽवा दुर्दिने न ज्ञाते घटिकादिके ग्रहनवांशादींश्च पृच्छाद्वदेत्[16] ।।**जातके यत्फलम् उक्तं तत्सर्वं प्रश्नेऽपि चिन्त्यम् इति वचनेन जातके यावन्तः विचाराः सन्ति ते सर्वे प्रश्नेऽपि चिन्तनीया इत्यवगम्यते।**बुद्ध्वा शास्त्रं यथा न्यायं बलाबलविधानतः यथोक्तं जातके सर्वं तद्वत् प्रश्नेऽपि चिन्तयेत्[17] ।।**इत्यनेन श्लोकेन अयं विचारः स्पष्टः। एवं जातकफलवत् प्रश्नफलप्रवचनमपि कर्तव्यमिति। यथोक्तम्-**जन्मलग्नतया प्रश्नलग्नं संकल्प्य पण्डितः। जातके यद्यदुद्दिष्टं तत्तत् प्रश्नेऽपि चिन्तयेत्[18] ।।**यथा जातके उदयलग्नं प्रधानम्, तथा प्रश्नशास्त्रे आरूढलग्नं प्रधानम्। अतः मनसि जिज्ञासा संजायते यद् आरूढराशिर्नाम कः? तस्य लक्षणं किम्? आरूढराशिः कथं निर्णीयते?

अस्मिन् विषये प्रश्नशास्त्रे बहवः अभिप्रायाः सन्ति। तेषु केचन अभिप्रायाः अत्र विविच्यन्ते **-आरूढत्वात् पृच्छकेन राशिरारूढ उच्यते। तस्मिन् सम्यक्परिज्ञाते सर्वं तेनैव चिन्त्यताम्[19] ।।** इति प्रश्नमार्गकारः प्रधानम् आरूढलक्षणं कथयति। पृच्छकः यं राशिम् अधिरूढः सन् प्रश्नं करोति स एव आरूढराशिः। तदानीं दैवज्ञः स्थित्यानुसारं प्रश्नकालीनउदयलग्नवशात् आरूढराशिवशात् च लग्नं सम्पाद्य तस्माद् द्वादशराशीन् तन्वादिद्वादशभावान् परिकल्प्य शुभाशुभचिन्तनं फलानुसारं क्रियते। जातके लग्नवत् प्रश्ने आरूढराशिः। अतः फलनिरूपणे प्रश्नशास्त्रमपि जातकेन समानं भवति। पृच्छकारूढराशेरज्ञाने स्वर्णविन्यासादिभिः प्रकारभेदैः आरूढराशिः निर्णीयते। प्रारब्धकर्मणां चिन्तनं जातकेन, इहार्जितकर्मणां चिन्तनं प्रश्नेनेति प्रश्नः जातकाद् भिद्यते। **इहार्जितं च विज्ञातुं कर्म प्रश्नो विधीयते[20]।** वराहमिहिराचार्येण

बृहत्संहितायां बहवः प्रश्नविषयाः उक्ताः सन्ति। अङ्गविद्याध्याये अस्य स्पष्टं रूपं पश्यामः-**दैवज्ञेन शुभाशुभं दिगुदितस्थानाहृतानीक्षता वाच्यं प्रष्टृनिजापराङ्गघटनां चालोक्य कालं धिया।सर्वज्ञो हि चराचरात्मकतयाऽसौ सर्वदर्शी विभुश्चेष्टाव्याहृतिभिः शुभाशुभफलं सन्दर्शयत्यर्थिनाम्**[21]।। पृच्छकस्य दिग् देशः पृच्छासमयः द्रव्याणि शकुनानि, अङ्गप्रत्ययङ्गसंस्पर्शः उक्तिः चेष्टा एतानि सर्वाणि समीक्ष्य दैववित् शुभाशुभफलं वदेदित्यर्थः। अस्मिन् विषये व्याख्याता भट्टोत्पलः पराशरमुनेर्वचनानि निर्दिशति। व्याख्याने तथा च पराशरः इह खलु चराचराणां भूतानां कालोऽन्तरात्मा सर्वदा सर्वदर्शी शुभाशुभैः यः फलसूचकः सः विशेषेण प्राणिनां स्वपराङ्गेषु स्पर्शव्यवहारेङ्गितचेष्टादिभि-र्निमित्तैः फलमभिदर्शयति इति। एवम् अङ्गस्पर्शादीनामपि फलज्ञापकत्वं समर्थितमस्ति। बृहत्संहिताया-मेव शकुनाध्याये शकुनफलानि सम्यङ्गिनरूपितानि। शकुनोत्तराध्याये शकुनानां, तत्काललग्नग्रहस्थिति-जनितफलानां च संवादं निरीक्ष्य शुभाशुभफलानि कथितानि सन्ति। एतान् अंशान् प्रश्नशास्त्रस्य केरलीयपद्धतौ विशेषेण पश्यामः।

**प्रश्नशास्त्रे सामान्यतः प्रतिपाद्यमानविषयाः ---**

दैवज्ञकृत्यं, पृच्छककृत्यम्, आरूढविधिः, प्रश्नसमये दैवज्ञेन अवधेयाः अंशाः, प्रश्नविधिः, अष्टमङ्गलप्रश्नविधिः, त्रिस्फुटाद्यानयनम्, आयुर्निरूपणं, मरणकालचिन्तनं, मरणकारणम्, रोगप्रश्नः, भोजनप्रश्नः, राजप्रश्नः, बाधानिरूपणं, ताम्बूलप्रश्नः, योगिनीनिरूपणं, विवाहप्रश्नः, सन्तानप्रश्नः, देवप्रश्नः, युद्धप्रश्नः, प्रेषितागमनप्रश्नः, वर्षप्रश्नः, कूपप्रश्नः, लाभप्रश्नः, सुरतप्रश्नः, नष्टप्रश्नः, स्वप्नप्रश्नः इत्यादयः बहवः विषयाः अस्मिन् शास्त्रे विचार्यन्ते।उत्तरभारते प्रश्ननिरूपणे ताजिकपद्धत्याः प्रभावो दृश्यते। नीलकण्ठाचार्यविरचितस्य ताजिकनीलकण्ठी नामकग्रन्थस्य एकः अध्यायः प्रश्नतन्त्रम् इति प्रसिद्धोऽस्ति। एतज्ताजिकपद्धत्या प्रश्नं विवृणोति। रोग-सन्तान-विवाहादिनानाविधप्रश्नफलनिरूपिताः ग्रहस्थितयः प्रश्नग्रन्थेषु प्रदर्शिताः सन्ति। प्रश्नवैष्णवाद्यन्ये बहवः ग्रन्थाः ताजिकपद्धत्या एव प्रश्ननिरूपणं कुर्वन्ति। प्रश्नकालिकमुदय-लग्नमधारीकृत्य फलकथनं प्रश्नः इति प्रायेण पाराशरादिषु ग्रन्थेषु बृहत्संहितायां च प्रश्नकालिक-लग्नादेव तात्कालिकग्रहस्थित्या फलनिरूपणं विवृतमस्ति।

**प्रश्नसमये दैवज्ञेन ज्ञातव्याः विषयाः एवं सन्ति-**

समयः, पृच्छादेशः, श्वासस्थितिः, दैवज्ञपृच्छकयोर्दशा, प्रष्टुः अङ्गस्पर्शनं, पृच्छकाश्रितराशिः, प्रश्नाक्षराणि, स्थितिः, चेष्टाभावविलोकनं, वस्त्रफलं, तत्कालशकुनानि। तदनन्तरम् अद्धोलिखित विषयाणामि उपरि ध्यानं दातव्यम। दैवज्ञः प्रातः काले उत्थाय शरीरशोधनादिकं सन्ध्यावन्दनादिकं च कृत्वा स्वस्थान्तरात्मना दैवज्ञेन दृष्टिपथे यः कोऽपि शुभाशुभं ज्ञातुम् आगच्छन्नस्ति वा न वा इति द्रष्टव्यम्। एवं कश्चन आयाति ज्ञातुम् चेत् तस्य चेष्टादिकं तत्कालजातं सदसन्निमित्तमपि संवीक्ष्य शुभाशुभं जानीयात्। प्रष्टुरागमनान्तरं पृच्छाकाले ज्ञातव्याः अंशाः अपि निगदिताः वर्तन्ते प्रश्नमार्गे यथा- **दैवज्ञेन समाहितेन समयो देशः स्ववायुर्दशा प्रष्टुः स्पर्शनमाश्रितर्क्षहरितौ प्रश्नाक्षराणि स्थितिः। चेष्टाभावविलोकने च वसनाद्यन्यच्च तत्कालजं पृच्छायाः समये तदेतदखिलं ज्ञेयं हि वक्तुं फलम्**[22] ।। विषयेऽस्मिन् आर्य्यासप्ततिग्रन्थे एवं कथितम्। दशभेदाः ग्रहाणां दीप्तावस्थादिदशभेदः इमे उक्ताः च जातकपारिजाते **दीप्तः, सुमुदितः, स्वस्थः, शान्तः, शक्तः, प्रपीडितः। विकलोऽस्तयातः**[23]। दशभेदान् बुधः ज्ञात्वा तथा ग्रहगणितं ब्रह्मसौरार्यादिपक्षेभ्यो ग्रहस्पष्टानयनगणितं च ज्ञात्वा निरवशेषम् अवशेषरहितं समस्तमित्यर्थः। जातकं जातकसम्बन्धि शास्त्रम् अवलोक्य यः प्रश्नशास्त्रज्ञः शुभं शुभफलम् अशुभम् अशुभफलं च कथयति तस्य प्रश्नशास्त्रस्य वाणी मिथ्या न भवेद् इति। भूभागे भुवः पृथिव्याः भागैकदेशः तस्मिन् सनक्षत्रं नक्षत्रैरश्विन्यादिभिः सहितं ग्रहगणं सम्पूज्य प्रश्नविधानं कुर्याद् येन निमित्तेन सिद्धम् आप्नुयात् दैवज्ञ इति। ततो भक्त्या निष्कपटतया विनयान्वितः युक्तः प्रष्टा वैदूर्यादिमणिसुवर्णैः युतैः फलपुष्पैः राशिचक्रं प्रश्नकुण्डलीम् अभ्यर्च्य सम्पूज्य ततः दैवज्ञतो यथाभिलषितं यथेष्टं प्रश्नं पृच्छेत्। एतादृशं जीवनाथेनापि प्रश्नभूषणे चोक्तं **शान्तो विवेकी शुद्धात्मा हिरण्यमणिसत्फलैः। दैवज्ञं प्रेमभावेन सम्पूज्यार्थं निवेदयेत्**[24]। वराहमिहिरा-चार्येण तु दैवज्ञनिवासस्थानलक्षणं बृहत्संहितायां विशेषतया चोक्तम्- **स्थानं पुष्पसुहासि भूरिफलभृत्सु-स्निग्धसच्छाद्वलयिति**[25]।

**प्रष्टाः कीदृशः इति प्रश्ने विचारः-** प्रातः काले गुरुदेवान् संवन्द्य कुसुमरत्नफलान्वितः सन् दैवज्ञम् आदरेण पृच्छेदिति। प्रश्नवाक्स्याक्षरैः प्रश्नलग्नेन बहिरन्तः स्थितैः शकुनैश्च सम्यग् विचार्य फलं ब्रूयादिति फलादेशक्रमः प्रतिपादितोऽस्ति।यथोक्तम्- **प्रश्नाक्षरैरुदयहेतुभिरुल्लसद्भिर्बाह्यस्थितैश्च शकुनैरधिगम्य सम्यक्। प्रष्टुः शुभं च यदि वाप्यशुभं प्रयतात्तत्कालजं तदिह दैवविदाऽभिधेयम्**[26]।।अत्र प्रश्नाक्षराणि शकुनानि च प्रश्नलग्नेन सह फलचिन्तने स्वीकृतानि। प्रश्नाक्षराणि शकुनानि च केरलीयप्रश्नपद्धतौ विशेषेण चिन्त्यन्ते। अत्रापि फलचिन्तने प्रश्नकालिकलग्नस्यैव प्राधान्यम्। पृच्छकारूढराशिः स्वर्णारूढराशिर्वा अत्र न निरूपितः**तनौ विधौ कंटकगेऽर्कसूनौ बुधेऽर्कलुप्ते च कुजेन्दुजाभ्याम्। समेक्षणेनेक्षितशीतभानौ प्रष्टा भवेद्वै कुटिलस्तदानीम्**[27]।।

लग्ने चन्द्रः, केन्द्रे (१,४,७,१०) शनिः स्थितश्चेद् बुधः अस्तंगतस्य चन्द्रस्य उपरि कुजः बुधस्य पूर्णदृष्टिश्चेत् पृच्छकः कुटिलः इति तदानीं तत् समये वक्तव्यम्।**लग्नेशुभे स्यात्सरलोऽन्यथा नहि यदींदुजीवौ हितदृष्टिवीक्षकौ। तनुस्त्रियोः स्यात्सरलो यदाऽस्तपे हिमेज्ययोरेकतमस्य वैरिदृक्। तदास्ति वक्रो यदि चंद्रगीष्पती किलैकभस्थौ सरलो नरो भवेत्**[28] ।। लग्ने शुभग्रहश्चेत् सरलः, अथवा सरलः नास्ति। एवं चन्द्रः गुरुः लग्ने स्थित्वा सप्तमस्थानं मित्रदृष्ट्या पश्यतिश्चेत् सरलः। अपि च सप्तमेशोपरि चन्द्रगुर्वोः एकस्यापि वैरिदृष्टिः भवति चेद् वक्रः अस्ति। एवमेव चन्द्रः गुरुः एकराशौ स्थितौ चेत् सरलः। बृहत्पराशरहोराशास्त्रे इत्थं प्रतिपादितम्- **प्रश्नाङ्गौ चन्द्रमन्दौ विरश्मिर्ज्ञो घटे रविः। पृच्छको दुष्टभावेनाऽयातश्चेति विनिर्णयेत्**[29] ।। यदि प्रश्नकालिकलग्ने चन्द्रराशिः, रश्मिबलरहितः बुधः, कुम्भे रविश्च वर्तते तर्हि पृच्छको दुष्टभावनायुक्तः परीक्षितुमागतः, न तु विश्वासेन पृच्छतीति वदेत। यदा यद्येकप्रष्टा युगपद्बहूनि प्रश्नानि पृच्छेत् तदा तु किं कर्तव्यमिति तत्तु चण्डेश्वरप्रश्नविद्यामुक्तम्-**आदिमं लग्नतो ज्ञानं चन्द्रस्थानाद् द्वितीयकम् । सूर्यस्थानतृतीयं स्यात्तुर्यं जीवगृहाद्भवेत्।।**

**बुदभृग्वोर्बलीयः स्यात्तद्वहात्पञ्चमं पुनः। राश्यनुरूपं कथयेदिति**[30] ।सुधीभिरेतत्सर्वं शास्त्रान्तरतोऽपि भृशं विचार्यमिति। बृहत्पराशरे मुष्टिप्रश्ने विशेषो कथितोऽस्ति तद्यथा-**प्रश्नाङ्गेऽस्तित्रिकोणे वा स्वांशं स्वांशगतो ग्रहः। पश्येत्तदा धातुचिन्ता जीवचिन्तान्यभागगः।। परांशं परभागस्थो मूलचिन्तां विनिर्दिशेत्।युग्मर्भेऽशक्रमाज् ज्ञेये जीवं मूलं च धातुकम्।। ओजेऽशक्रमतो धातु-मूलजीवानि मौष्टिके**[31] ।

**केरलप्रान्ते प्रश्नशास्त्रस्य वैशिष्ट्यम्**

भारतीयज्यौतिषे प्रश्नभागस्य विशेषेण विकासः केरलराज्ये बभूव। केरलीयाः प्राचीनाः ज्योतिर्विदः प्रश्नभागोक्तानां समयदेशश्वासाङ्गस्पर्शादिविषयाणां परस्परसम्बन्धं विचिन्त्य स्वधिया एव प्रश्नभागस्य एकं शास्त्रीयं स्वरूपं प्रदत्तवन्तः। केरलीयाः दैवज्ञाः पराशरवशिष्ठहोराद्यार्षग्रन्थान् बृहज्जातकबृहत्संहितायात्रापटलषट्पञ्चाशिकार्यासप्ततिकृष्णीयादिप्राचीनप्रश्नग्रन्थान्नपि सम्यग्विमृश्य तदुक्तविषयानुसारेण शुभाशुभफलनिर्णयस्य विशिष्टां सारणिं दर्शितवन्तः। **यदधिकं परिपच्यते तद्** इति होराचार्यवचनानुसारेण समयदेशश्वासस्पर्शशकुनादिभिः सह ग्रहस्थितफलस्य संवादं विचिन्त्य फलनिर्णयं चक्रुः। प्रश्नकालिकोदयलग्नस्य आरूढराशिना सह तुल्यं यथा प्रश्नमार्गे-**तत्कालोद्यद्राशिः प्रष्टारूढश्च लग्नशब्दोक्तौ । कृष्णीयादिषु कथितं ताभ्यां द्वाभ्यां फलं हि वाच्यमिति**[32] ।।

प्राधान्यं दत्त्वा अन्यानपि कथयति- **आरूढोदयलग्नांशच्छत्रस्पृष्टाङ्गराशयः। चन्द्राधिष्ठितराशिश्च चिन्त्यः षट्प्रश्नकर्मणि**[33] ।।

मुख्यराशीन् संकलय्य प्रश्नभागे द्वित्रिसंवादतः स्पष्टमिति संवादचिन्तनशैलीं प्रारब्धवन्तः । अतः प्रश्नशास्त्रमिति पदस्य केरलपदपूर्वकं केरलप्रश्नशास्त्रमित्येव व्यवहारः लोके। केरलप्रश्नशास्त्रे वराहहोराशास्त्रस्य यथा प्राशस्त्यं तथैव कृष्णाचार्यविरचितस्य कृष्णीयहोराशास्त्रस्यापि विशिष्टं स्थानमस्ति। प्रश्नमार्गे ग्रन्थकारेण इत्थं निरूप्यते- **होरां वराहमिहिरास्यविनिर्गतां यं मालामिवादधति दैवविदः स्वकण्ठे । कृष्णीयशास्त्रमपि भर्तृमतीव सूत्रं तेषां सभासु महती भवतीह शोभा**[34]।।

होराशास्त्रमर्मज्ञः आचार्यवराहमिहिरस्य मुखादनायासेन विस्सृतां होरां दैवज्ञां मालामिव स्वकण्ठे धारयन्ति। तथा कृष्णीयहोराशास्त्रमपि भर्तुः आयुर्वृद्ध्यर्थं श्रेयोऽर्थं च सुमङ्गल्या ध्रियमाणं मङ्गल-सूत्रमिव धारयन्तीति। एवं वराहहोरायाः कृष्णीयहोरायाश्च तुल्यं प्राधान्यं प्रदत्तमस्ति। कृष्णीयहोराशास्त्रे जातकभागस्य सामान्यविषयाणां निरूपणानन्तरं प्रश्नविषयाः एव विशेषेण निरूप्यन्ते। जातकप्रश्नोभय-प्रतिपादकस्यास्य ग्रन्थस्य केरलीयप्रश्नपद्धतौ विशेषेण अनुसरणमस्ति। किन्तु प्रश्नमार्गस्य लोके जनानामादरः प्रचारश्च वरीवर्ति।

प्रश्नायनम्, प्रश्नकौतुकम् इत्यादयः अन्ये अपि लघुग्रन्थाः केरले प्रश्नचिन्तने उपयुज्यन्ते। एवं केरलीयपद्धतौ बहवः प्रश्नग्रन्थाः विराजन्ते। एतेषां मलयालभाषया बहूनि व्याख्यानान्यपि आरचितानि सन्ति। कीदृग्विशिष्टो ज्यौतिषिकः, विद्वान् महामन्त्रसिद्धिक इति मन्ये, सोऽपि निर्दिष्टः तद्यथा- **स्वाध्यायी ग्रहपूजायां रतोऽनालसको द्विजः। स्त्रग्वी नासत्यवादी स्यात्तेनोक्तं न मृषा भवेत्**[35] ।।

इत्यनेन दैवज्ञः शास्त्रे अत्यन्तनिपुणः चेदपि सिद्धमन्त्रः अवश्यं स्यादेव-**मन्त्रं यथाविधि गुरोः सुदिने गृहीत्वा तद्देवतां जपहुतप्रमुखैः प्रतोष्य । ज्ञानाय जातकफलस्य तु सिद्धमन्त्रः स्यादेव दैवविदिहाप्तवचस्तथाहि**[36] ।।

अपि च –**गुरुभ्यश्च ग्रहेभ्यश्च मया दत्तोयमञ्जलिः। प्रश्नमनसस्ते मे सत्यां कुर्वन्तु भारतीम्** [37]।।

हास्येन नाचरेत् प्रश्नं कदाच्छिभमिच्छुकः। एवं ज्योतिर्विद्योपजीविनां प्रश्नमार्गस्य साहाय्यं विशिष्टस्थानम् अलङ्करोति। **इतिशम्**

**सन्दर्भ-सूची**


1.प्रश्नमार्गः 2-12
2.बृहज्जातक 26-01
3. प्रश्नमार्गः 1-46
4. बृहज्जातक 6-13
5. गीता 9-21
6. प्रश्नमार्गः 1-33
7. विपाकसंहिता 9-4-27
8. गीता 11-7
9. प्रश्नमार्गः 9-23
10.गीता 4-8
11. प्रश्नमार्गः1-37
12. प्रश्नमार्गः1-43,44
13. प्रश्नमार्गः1-40
14. प्रश्नमार्गः1-41
15.सर्वार्थचिन्तामणि1-5
16.उत्तरकालामृत 1-1
17. प्रश्नमार्गः1-45
18. प्रश्नमार्गः1-47
19. प्रश्नमार्गः2-10
20.प्रश्नमार्गः1-41
21.बृहत्संहिता51-01
22. प्रश्नमार्गः2-12
23.जातकपारिजात 3-1,2,3
24.प्रश्नभूषण1-4
25.बृहत्संहिता 53-27
26.दैवज्ञवल्लभवम् 3-11
27.प्रश्नशिरोमणि2-21
28.प्रश्नशिरोमणि 2-22
29.बृहत्पराशर 84-13
30.चण्डेश्वरप्रश्नविद्या 1-01
31.बृहत्पराशर 84-17,18
32.प्रश्नमार्ग 9-26
33.प्रश्नमार्ग8-01
34.प्रश्नमार्ग1-29
35.कृतहोराचतुरसुन्दरीव्याख्या-23
36.प्रश्नमार्ग 1-10
37.प्रश्नमार्ग 1-11


**ज्यौतिषविभागः राष्ट्रियसंस्कृतविद्यापीठम् तिरुपतिः**

# साहित्यशास्त्रे अलङ्कारशास्त्रस्य व्याकरणादि शास्त्रान्तरैः समीक्षणम्

✍डॉ0 गंगाधर झा

विदितमेवेतद्यद भारतीय संस्कृतवाङ्मयेऽलङ्कारशास्त्रं व्याकरणाद्यङ्गषट्कापेक्षयाऽतिरिक्तं सप्तमं वेदाङ्गमिति परिगण्यते। आन्वीक्षिक्यादिविद्यानिष्यन्दरूपमलङ्कारशास्त्रमान्वीक्षिकी–त्रयो–वार्ता– दण्डनीतिरूपचतुर्विद्यातिरिक्तं सत् पञ्चमी विद्येति परिकीर्त्यते। अत्र तत्रभवते राजशेखरस्य वाक्यानि परिशीलन मर्हन्ति –

उपकारत्वादलङ्कारः सप्तममङ्गमिति यायावरीयः। ऋते च तत्स्वरूपपरिज्ञानाद् वेदार्थानवगतेः।

पञ्चमी साहित्यविद्येति यायावरीयः। सा हि चतसृणां विद्यानां निष्यन्दः।

**सकलविद्यास्थानैकायतनं पञ्चदश काव्यविद्यास्थानमिति यायावरीयः।**[1]

चतुर्दशाष्टादशप्रस्थानभिन्नानां विद्यानां सहभावात्मकमलङ्कार शास्त्रं साहित्यशास्त्रमिति व्यपदिश्यते। अलङ्कारशास्त्रं काव्यस्वरूपगुणदोषालंकारविवेचनपुरस्सरं काव्यसौन्दर्ये व्युत्पत्तिमादधाति। काव्यसौन्दर्य विवेचनपराणामालंकारिकाणां सर्वेषां शास्त्राणां परिशीलनमपेक्षितमापतति। इत्थं काव्यसौन्दर्यविवेचकस्यालङ्कारशास्त्रस्य व्याकरणादि शास्त्रान्तरैः सह निकटः संपर्कोऽवश्यमपेक्ष्यते।

**अलङ्कारव्याकरणशास्त्रयोः समीक्षणम् –**

अलङ्कारशास्त्रस्य व्याकरणशास्त्रेण सह संबन्धः सन्निहितः। आलंकारिकाणां ध्वनिर्व्यङ्ग्यो वा वैयाकरणानां स्फोटेन समानो वर्तते। ध्वन्यालोक आनन्दवर्धनाचार्येण प्रतिष्ठापितो ध्वनिसिद्धान्तो वैयाकरणानां स्फोटवादेन प्रभावितो दृश्यते। स्फुटत्यस्मादर्थ इति स्फोट इति व्युत्पत्त्या प्रवृत्तः स्फोटसिद्धान्तोऽनश्वरशब्दसिद्धान्तो वर्तते।

**अबङ् स्फोटायनस्य**[2]

इत्यस्य पाणिनेः सूत्रस्याधारेण स्फोटसिद्धान्तः पुरातन इति कथयन्ति विमर्शकाः।

**स्फोटरूपविभागेन ध्वनेर्ग्रहणमिष्यते**[3]

इति स्फोटभिन्नतया ध्वनिमङ्गीकुर्वन्ति वैयाकरणाः।

एतदेवालङ्कारिकैरङगीक्रियते। ध्वन्यालोके समासोक्त्याद्यलङ्कारा पेक्षया ध्वनेर्भिन्नविषयत्वं प्रदर्शयतानन्दवर्धनेन ''सूरिभिः कथित'' इति ध्वनिलक्षणवाक्यांशं विशदयता।

**''सूरिभिः कथित इति विद्वदुपज्ञेयमुक्तिः।**

**न तु यथाकथंचित् प्रवृत्तेति प्रतिपाद्यते।।**

प्रथमे हि विद्वांसो वैयाकरणा व्याकरणमूलत्वात् सवविद्यानाम्। ते च श्रूयमाणेषु वर्णेषु ध्वनिरिति व्यवहरन्ति। तथैवान्यैस्तन्मतानुसारिभिर्वाच्यवाचकसम्मिश्रः शब्दात्मा काव्यमिति व्यपदेश्यो व्यञ्जकत्वसाम्याद् ध्वनिरित्युक्तः।[4]

इत्युपस्थाप्यते वृत्तिवाक्यम्। एतद्वयाकुर्वस्तत्रभवालँ, लोचनकारोऽभिनवगुप्तपादाचार्यः प्रथितस्य वैयाकरणस्य भगवतो भर्तृहरेः

**यः संयोगवियोगाभ्यां करणैरूपजन्यते।**

**सः स्फोटः शन्दजाः शब्दा ध्वनयोऽन्यैरूदाहृताः।।**

इत्येतद्वाक्यमुद्धरति कथयति च

**एवं घण्टादिनिर्ह्रादस्थानीयोऽनुरणनात्मोपलक्षितो**

**व्यङ्ग्योऽप्यर्थो ध्वनिरिति व्यवहृतः**[5]

इति। मम्मटेनाप्युत्तमकाव्यलक्षणम्

''इदमिति काव्यम्। बुधैर्वैयाकरणैः प्रधानभूतस्फोटरूपव्यङ्ग्यव्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहार कृतः, ततः तन्मतानुसारिभिरन्यैरपि न्याग्भावितवोच्यव्यङ्ग्यव्यञ्जनक्षमस्य शब्दार्थयुगलस्य''।[6]

 ISSN – 2349-3100

इति स्पष्टीक्रियते। अनेन वाच्यवाचकसंमिश्रशब्दात्मनः काव्यस्य ध्वनित्वमालङ्कारिकाणां संमतमित्यायाति। तथा च साहित्यशास्त्रे ध्वनिसिद्धान्तो वैयाकरणस्फोटवादमूलमिति वक्तव्यं भवति –

किं च शब्दानां सङ्केतितार्थे वैयाकरणमतमालंकारिका आद्रियन्ते। शब्दानां तदुपाधौ  सङ्केत इति वैयाकरणानां मतमेव तत्र भवता काव्य प्रकाशकारेणोक्तम्।

न हि गौः स्वरूपेण गौर्नाप्यगौर्गोत्वाभिसंबन्धात्तु गौरिति भर्तृहरि वाक्यम्।

**''गौः शुक्लश्चलो डित्थ इत्यादौ चतुष्टयी शब्दानां प्रवृत्तिः''**[7]

इति पतञ्जलिवचनं च प्रमाणतयोपन्यस्यते।

एवं शब्दीव्यञ्जनानिरूपण आलङ्कारिकैवैयाकरणानुमतान् संयोगादीनभिधानियामकत्वेनाङ्गीकुर्वन्ति।

काव्यदोषप्रकरणे च्युतसंस्कारदोषमुपपादयन्तोऽलंकारप्रकरण उपमाप्रभेदान् निर्दिशन्तश्च मम्मटाचार्यप्रभृतय अलंकारिका वैयाकरणसिद्धान्तानङ्गीकुर्वन्ति। रीतिं काव्यात्मानं मन्यमानो वामनाचार्यः स्वग्रन्थे शब्दशुद्धिप्रकरणं संयोज्य वैयाकरणसिद्धान्तानुरोधेन महाकविप्रयोगाणां साधुत्वं विमृशति।

अनेनैतद्वक्तुं शक्यते यदलंकारशास्त्रे व्याकरणशास्त्रस्य वर्तते महान् प्रभाव इति।

**अलंकारन्यायशास्त्रयोः संबन्धः**

अलङ्कारशास्त्रं न्यायशास्त्रेणापि प्रभावितं दृश्यते। आलङ्कारिकाणां लक्षणाया नैयायिकानां लक्षणायाश्च सम्बन्धो महान्। पण्डित राजो जगन्नाथो लक्षणां ''शक्यसम्बन्धो लक्षणा'' इति लक्षयन् न्याय सिद्धान्तमनुसरति। व्यञ्जनावृत्ति तिरस्कुर्वता प्रतिज्ञानुरोधेन ध्वनेरन्तर्भावमुपपादयता महिमभट्टेन

''**अनुमानेऽन्तर्भावं सर्वस्यैव ध्वनेः प्रकाशयितुम्।8**

**व्यक्तिविवेकं कुरूते प्रणम्य महिमा परां वाचम्।।''**

इति काव्यानुमानस्य चमत्कृत्याधानादनुमानान्तरवैलक्षण्यमुपस्थाप्यते।

किं चालङ्कारिकैरङ्गीक्रियमानोऽनुमानालंकारः प्रमाणालंकारवर्गश्च न्यायशास्त्रसिद्धान्तेन प्रभावितो वर्तते। तदिभ्नत्वे सति तद्गतभूयोधर्मं–वत्वमिति लक्षितं सादृश्यमुपमालंकार औपम्यगर्भालंकारेषु च जीवातुतयाऽभ्युपगम्यते।

**वाक्यं स्याद् योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः।**[9]

इति विश्वनाथेन वाक्यलक्षणे न्यायशास्त्रप्रसिद्धा योग्यतादि सिद्धान्ता अन्तर्भाव्यन्ते।

एवं **भरतमुनेर्**

**''विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः।**[10]

इति रसनिष्पत्तिसूत्रं व्याकर्वञ् शङ्कुकः सूत्रगतस्य ''संयोगा'' दित्यस्य पदस्य गम्यगमकभावरूपादिति ''निष्पत्ति'' – रित्यस्य पदस्यानुमितिरिति चार्थमुपवर्णयतिः विभावानुभावव्यभिचारिभिर्गम्यगमकभावरूपात् सम्बन्धान् नटे पक्षे, रसस्य साध्यस्य निष्पत्तिरनुमितिर्भवतीति सूत्रार्थमुपन्यस्यति। रूपकाद्यलंकारेषु शाब्दबोध आलंकारिका नैयायिका इव प्रथमान्तमुख्य – विशेष्यकशाब्दबोधमङ्गीकुर्वन्ति। इत्थमलंकारशास्त्रं न्यायशास्त्रेणोपबृं हितमास्ते।

**अलंकारपूर्वमीमांसाशास्त्रयोः संबन्धः**

वेदवाक्यानामर्थनिर्णये प्रवृत्तस्य मीमांसाशास्त्रस्यालंकारशास्त्रस्य च सम्बन्धो महान्। मीमांसायां विचाराः शास्त्रान्तरोपकारकाः। मीमांसकानां मतमनुसृत्यालंकारशास्त्रे रसस्योत्पत्तिवादः प्रचलति। तात्पर्याख्यां वृत्तिं मीमांसकैकदेशिभिः (भट्टमीमांसकैः) स्वीकृतामालंकारिकाः प्रायोऽङ्गीकुर्वन्ति।

**''तात्पर्याख्योपि केषुचित्**[11]**''** इत्योक्तिः

''गङ्गायां घोषः'' इत्यादौ शैत्यपावनत्वादिप्रयोजनविशिष्टतीरे लक्षणामाशङ्क्य निरस्यन्त आलंकारिकाः प्रत्यक्षादेर्नीलादिर्विषयः, फलं तु प्रकटयतीत्यध्वरमीमांसकसिद्धान्तमनुसरन्ति।

आलंकारिकैरङ्गीकृतोऽर्थपत्यलंकारः, परिसंख्यालंकारश्च मीमांस काभिमतमर्थपत्तिप्रमाणं परिसंख्याविधिं च स्मारयतः।

**अलंकारवेदान्तशास्त्रयोः संबन्धः**

अलंकारशास्त्रं वेदान्तेनातीव प्रभावितं दृश्यते। तथा हि –

रसगङ्गाधरकारोऽभिनवगुप्तपादमते रसं ब्रह्मभिन्नं वदन्

**रसो वै सः। रसं ह्येवायं लब्ध्वानन्दी भवति**[12]

(तैत्तिरीयोपनिषत्)

इति उपनिषद्वाक्यं प्रमाणीकरोति। अपि च तत्रैव स रसचर्वणां शाब्दीमपरोक्षात्मिकां चोपपादयति। एवमालंकारिकाः रसस्वरूपेऽभिनव गुप्ताचार्यमतमेव विशिष्याद्रियन्ते वेदान्तशास्त्रप्रभावश्चालंकारशास्त्रे सम्यग् वर्तत इति वक्तुं पार्यते।

इत्थमलंकारशास्त्रं व्याकरणादिभिः प्रथितैः शास्त्रान्तरैः सह निकटं सम्पर्क प्राप्यं महीयत इत्यलं सविस्तरेण्ज्ञं ।

**सहायक ग्रन्थानां सूचीः**


1. काव्यमीमांसा पृष्ठम् 7, 9–10
2. अष्टाध्यायी 6–1–123
3. वाक्यपदीयम् 1 अध्यायः :– 81 कारिका
4. ध्वन्यालोकः पृष्ठम् 265
5. ध्वन्यालोकः लोचनम् पृष्ठम् 270
6. काव्यप्रकाशः पृष्ठम् 8
7. आई डी 13–14
8. व्यक्तिविवेकः पृष्ठम्1
9. साहित्यदर्पणः पृष्ठम् 31
10. नाट्यशास्त्रम् 5 (अध्यायः) पृष्ठम 272
11. काव्यप्रकाशः पृष्ठम् 11
12. रसगङ्गाधरः पृष्ठम 91


**सहायक प्रोफेसर (साहित्य विभाग)**
**लक्ष्मी देवी शराफ आदर्श संस्कृत महाविद्यालय,**

**देवघर, झारखंड – 814112**

 ISSN – 2349-3100

# परमेश्वरकृतविवरणव्याख्योक्तरीत्या इष्टयुगादितः ग्रहसाधने भगणादीनां संक्षेपकरणविधिः

✍ विजयानन्दः अडिगः बि

अथ सर्वसिद्धान्तामलकमलिनीकमलायमाने गहनगणितवासनाविकासिनि सर्वसिद्धान्तरम्ये सूर्यसिद्धान्ते आदावेव बह्वायासकारकगणितकर्मणा सृष्ट्यादितः अहर्गणः, तद्वशात् मध्यस्पष्टग्रहानयनक्रमश्च भगवता अभ्यधायि । परञ्च आकल्पारम्भात् आकल्पान्तं वर्षदैर्घ्यस्य साम्याभावात् वर्षदैर्घ्यजनितव्यत्यासात् अभीष्टाहर्गणे व्यभिचारदर्शनात् ततः मध्यस्पष्टग्रहेषु अपि बह्वन्तरं जायत इति अयम् अंशः गणिततरङ्गिणीविलासिगणककलहंसानाम् ज्ञायतेऽतितराम् । एवं सृष्ट्यादितः ग्रहसाधने गणितबाहुल्यं दृक्प्रतीत्यभावत्वं च अवलोक्य तन्निरासार्थं ततः परम् अल्पायासकारकगणितकर्मणा अभीष्टयुगादितः अहर्गणः, तद्वशात् मध्यस्पष्टग्रहानयनक्रमश्च प्रत्यपादि । तद्यथा -

**विस्तरेणैतदुदितं संक्षेपाद्व्यावहारिकम् ।**
**मध्यमानयनं कार्यं ग्रहाणामिष्टतो युगात् ।**[1]

विषयेऽस्मिन् परमेश्वरदैवज्ञः[2] स्वविवृतविवरणव्याख्यायाम् एवम् आह- ' एतत् विस्तरेण उदितम् , अथ इष्टतः युगात् स्वकल्पितात् द्युगतकालात् व्यावहारिकं कर्मक्षमं मध्यमानयनं संक्षेपात् इष्टयुगकालवशात् कर्तव्यम् ।

**भगणादीनि संक्षिप्य कार्यं तच्च प्रदर्श्यते**
**कल्पस्य यस्सहस्रांशो युगं तावत्कीर्तितम् ।**
**चतुर्विंशो युगस्यांशस्सूर्याचन्द्रमसोर्युगम्**
**एकैकमष्टादशभिः सूर्याब्दैरयुताहतैः ।**
**तत्रार्केन्द्वधिमासार्किशुक्राणां स्यान्निरंशता । इति '** । [3]

कल्पस्य सहस्रांशप्रमाणमेव महायुगमानं भवति । यतः कल्पसौरवर्षप्रमाणम् 4320000000 । अस्य सहस्रतमः अंशः 4320000000 ÷ 1000 = 4320000 एतदेव महायुगीयसौरवर्षमानं भवति । अस्य महायुगमाणस्य अर्थात् चतुर्युगकालस्य चतुर्विंशः भागः 4320000 ÷ 24 =180000 एतावन्मितं सूर्याचन्द्रमसोः युगम् इति कल्पितम् । एकैकं युगमपि अयुताहतैः अष्टादशभिः 10000×18=180000 सौरवर्षैः सम्भवति , एवं चतुर्युगे 24 युगानि जातानि । एवमत्र एकैकस्मिन् युगे रविचन्द्राधिमासशनिशुक्रोच्चानां भगणपूर्तिः (निरंशता) स्यात् । तद्यथा -

$\frac{4320000\times180000}{4320000}$=180000 रविभगणाः $\frac{57753336\times180000}{4320000}$= 2406389 चन्द्रभगणाः

$\frac{1593336\times180000}{4320000}$ = 66389 अधिमासाः $\frac{146568\times180000}{43200000}$ = 6107 शनिभगणाः

$\frac{7022376\times180000}{4320000}$ = 292599 शुक्रशीघ्रोच्चभगणाः ।

अत्रौवमनुपातः - यदि महायुगीयसौरवर्षैः महायुगीयरविचन्द्राधिमासशनिशुक्रोच्चभगणाश्चेल्लभ्यन्ते तर्हि 180000 सौरवर्षैः किमिति ? तदा निश्शेषाः भगणाः सिद्ध्यन्ति । एतदेवाह -

अष्टादशायुतान्यत्र सूर्यस्य भगणाः स्मृताः। (180000 रविभगणाः)

नवाष्टगुणषट्शून्यकृतनेत्राणि शीतगोः। (2406389 चन्द्रभगणाः)

अधिमासा नवाष्टाग्निरसष्ट्कास्तिथिक्षयाः। (66389 अधिमासाः)

अद्रिखेन्दुरसाः शनेः (6107 शनिभगणाः)

नवगोतत्त्वरन्ध्राक्षिसंख्या दैत्यगुरोस्तथा । (292599 शु.शी.भगणाः) । [4] इति ।

अथ येषां भगणानां 180000 सौरवर्षेषु सावयवत्वमेव अवशिष्यते तानाह –

**षडंशोनास्समुद्राङ्कखपञ्चाब्धिदिशास्तथा।**
**भानां रसाद्रिपञ्चर्तुपक्षाङ्केषुरसास्तथा ।**
**रसाद्रिशरतर्काब्धिनगपञ्चरसास्त्विह ।**
**सषडंशाः कुदिवसाः ततः शीतगुवासराः ।**
**खाद्रितर्केन्दुनन्दाद्रिरसषट्कास्स्मृतास्ततः ।**
**खखव्योमशरग्न्यष्टकृतषट्चार्कवासराः ।**[5]

अत्रापि सर्वत्रा पूर्ववदेव महायुगीयसौरवर्षैः महायुगीयतिथिक्षयादयश्चेल्लभ्यन्ते तर्हि 18000 सौरवर्षैः किमिति अनुपातः , तदा सावयवानि क्षयदिनभदिनभूदिनानि लभ्यन्ते । तद्यथा -
$\frac{25082252\times180000}{4320000}$ =1045093.833333 क्षयदिनानि । अत्र 0.833333 दिनशेषप्रमाणम् = 50 घटिकाः अर्थात् दिनस्य $\frac{5}{6}$ अंशः स्यात् । तदात्र गणितसौकर्यार्थं 1045094 इति पूर्णाङ्कः यदि स्वीक्रियते तर्हि 7200000 न्यूनाः शेषाः अवशिष्यन्ते अस्य दिनशेषस्य घटीरूपेण यदि परिणाम्यते तर्हि 10 घटिकाः सिद्ध्यन्ति एते एव दिनस्य $\frac{1}{6}$ अंशः । अत एव उक्तमानात् षडंशः शोध्यः इत्युक्तम् ।
एवमेव $\frac{1582237828\times180000}{4320000}$= 65926576.166666 भदिनानि । $\frac{1577917828\times180000}{4320000}$ = 65746576.166666 भूदिनानि । अत्र भूदिवसाः सषडंशाः भानां दिवसाश्च सषडंशाः, अर्थात् अत्र 0.166666 दिनशेषप्रमाणम् = 10 घटिकाः , एता एव दिनस्य $\frac{1}{6}$ अंशः । अत एव उक्तमानात् षडंशः क्षेप्यः इत्युक्तम् । पुनरत्र इन्द्वर्कभगणानां शेषाभावात् तद्दिनानामपि शेषो न स्यात् ।
तद्यथा - $\frac{1603000080\times180000}{4320000}$ = 66791670 चान्द्रवासराः खाद्रितर्केन्दुनन्दाद्रिरसषट्कास्स्मृताः ।
$\frac{51840000\times180000}{4320000}$= 2160000 रविमासाः×30 = 6480000 रविवासराः खखव्योमश्शरन्याष्टकृतषट्काः । एवं सिद्ध्यन्ति ।
इदानीं पुनः अवशिष्टानां कुजबुधेच्चगुरुचन्द्रोच्चचन्द्रपातानां सावयवान् भगणान् आह -

**कुजस्य भगणा राशिचतुष्कसहिता अमी ।**
**चन्द्रखाद्रीषुनन्दास्स्यु ।**
**ज्ञशीघ्रस्य स्वराद्यग्निसप्तवेदनगास्तथा ।**
**भगणास्ते सषड्भाः स्युः तथैव भगणाः परे ।**
**राशिद्वयोनाः षट्सप्तरूपपञ्चेन्दवो गुरोः ।**
**मन्दोच्चका विधोः । साष्टांशाः पक्षवेदाग्निनखाः**
**पातस्य सेषुभाः । रसाद्रिरसनन्दास्स्युः**[6]

अत्राप्यनुपातः पूर्ववत् , तद्यथा - $\frac{2296832\times180000}{4320000}$=95701.33333.... कुजभगणाः । अत्र 0.33333.... अस्मिन् भगणावशेषे द्वादशगुणिते 0.33333..×12 = 4 चत्वारः राशयः लभ्यन्ते । अतः राशिचतुष्कसहिताः चन्द्रखाद्रीषुनन्दाः इत्येतावन्मिताः कुजभगणाः सिद्ध्यन्ति।
एवमेव - $\frac{17937060\times180000}{4320000}$ = 747377.5 बुधेच्चभगणाः । अत्रापि 0.5 अस्मिन् भगणावशेषे
द्वादशगुणिते 0.5×12 = 6 षट् राशयः लभ्यन्ते। अतः सषड्भाः स्वराद्यग्निसप्तवेदनगाः इत्येतावन्मिताः बुधेच्चभगणाः सिद्ध्यन्ति।
तथैव $\frac{364220\times180000}{4320000}$= 15175.833333.... गुरुभगणाः । अत्रापि 0.833333.... अस्मिन् भगणावशेषे

 ISSN – 2349-3100

द्वादशगुणिते 0.833333....×12 = 10 दश राशयः लभ्यन्ते , भगणात् (द्वादशभ्यः राशिभ्यः) राशिद्वयस्य विशोध्नेन दश राशयः अवशिष्यन्ते इत्यतः 15176 इत्येव भगणसंख्यां स्वीकृत्य ततो राशिद्वयम् ऊनीकृतम् । अत एव राशिद्वयोनाः षट्सप्तरूपपञ्चेन्दवः इत्येतावन्मिताः गुरुभगणाः सिद्ध्यन्ति ।

एवमेव $\frac{48811\times180000}{4320000}$=20342.125 चन्द्रोच्चभगणाः । अत्रापि 0.125 अस्मिन् भगणावशेषे द्वादशगुणिते

0.125×12 = 1.5 एको राशिः, राश्यवशेषे त्रिंशता गुणिते 0.5×30 = 15 पञ्चदश अंशाश्च लभ्यन्ते। अत्र $01^{s}$-15° = 45° एते एव भगणस्य अष्टांशाः, यतो हि - 360°÷8=45° = साधर्धैकराशिरिति यावत् । अत एव साष्टांशाः पक्षवेदाग्निनखाः इत्येतावन्मिताः चन्द्रोच्चभगणाः सिद्धाः ।

तथैव $\frac{232238\times180000}{4320000}$=9676.5833333 चन्द्रपातभगणाः । अत्रापि 0.5833333 अस्मिन् भगणावशेषे

द्वादशगुणिते 0.5833333×12 = 7 सप्त राशयः लभ्यन्ते , पातस्य वामगतित्वात् मेषादितः गणनार्थं चक्राद्विशोध्ने कृते 12-7=5 राशयः लभ्यन्ते । अतः सेषुभाः रसाद्रिरसनन्दाः इत्येतावन्मिताः पातभगणाः सिद्धाः ।

एवं सूर्याचन्द्रमसोः युगमिति पठिते काले एते भगणादयः , अर्थात् चतुर्युगस्य चतुर्विंशो भागः अत्र भगणादिः भवति । परञ्च मन्दोच्चपातानां महायुगेSपि भगणपूर्तिः न जायते किमुत 180000 एषु वर्षेषु ? अतः मन्दोच्चादीनां निरंशताभावात् तेषाम् इष्टयुगारम्भे राशिभागलिप्तारूपान् ध्रुवकान् कुर्यात् ततः शेषकालसम्भवगतिश्च (मन्दोच्चपातानां वार्षिकगतिः×अभीष्टगतवर्षाणि= शेषकालसम्भवगतिः) तेषु योज्या भवति । तदेतदुक्तम् -

भगणाल्पतयान्येषां युगेस्मिन्ननिरंशता । भवेन्मन्दोच्चपातानां कुर्यात्तध्रुवकानतः[7]। इति ।

एवं तर्हि प्रत्येकं 180000 सौरवर्षेषु ग्रहाणाम् अधिमासादीनां च स्थितिः -

| ग्रहाः | ग्रहाणां स्थितिः | ग्रहाः | ग्रहाणां स्थितिः |
|---|---|---|---|
| रविः | $00^{S}$-00°-00'-00" | चन्द्रोच्चम् | $01^{S}$-15°-00'-00" |
| चन्द्रः | $00^{S}$-00°-00'-00" | चन्द्रपातः | $05^{S}$-00°-00'-00" |
| कुजः | $04^{S}$-00°-00'-00" | कुजशीघ्रोच्चम् | $00^{S}$-00°-00'-00" |
| बुधः | $00^{S}$-00°-00'-00" | बुधशीघ्रोच्चम् | $06^{S}$-00°-00'-00" |
| गुरुः | $10^{S}$-00°-00'-00' | गुरुशीघ्रोच्चम् | $00^{S}$-00°-00'-00" |
| शुक्रः | $00^{S}$-00°-00'-00" | शुक्रशीघ्रोच्चम् | $00^{S}$-00°-00'-00" |
| शनिः | $00^{S}$-00°-00'-00" | शनिशीघ्रोच्चम् | $00^{S}$-00°-00'-00" |

| | |
|---|---|
| अधिमासाः | 66389 |
| क्षयदिनानि | 1045093.833333 (षडंशोनाः 1045094 -10घटिकाः) |
| भदिनानि | 65926576.166666. (सषडंशाः 65926576+10घटिकाः) |
| भूदिनानि | 65746576.166666. (सषडंशाः 65746576+10घटिकाः) |
| चान्द्रवासराः | 66791670 |
| रविवासराः | 64800000 |

अतः परम् अभीष्टदिने अहर्गणादिग्रहानयनक्रमः उच्यते -

**संशोध्य कालसंख्यानं चन्द्रार्कयुगसंख्यया ।**
**शेषाद्युगादिदिनजात्प्राग्वत्कुर्यादहर्गणम्** [8]। **इति॥**

अतीतं वर्षसमूहं चन्द्रार्कयुगपठितेन वर्षगणेन (180000) विभज्य शेषात् वर्षगणात् पूर्ववत् अहर्गणं कुर्यात् , तस्मिन्नहर्गणे युगारम्भे यो वारपः तद्वारपादिवारपो वेद्यः। तस्माच्च अहर्गणात् मध्यमग्रहानानयेत् । ततः युगे निरंशाभाववतां मन्दोच्चपातानां युगारम्भकालजातान् राश्यादिरूपान् ध्रुवांश्च आनीय संस्कुर्यात्। ततश्च 'ग्रहं संशोध्य मन्दोच्चात्' [9] इत्यादिनैव स्पष्टाः ग्रहाः साध्याः ।

एवं रुद्रशिष्येण पारमेश्वरेण इष्टकालतः ग्रहसाधने नूत्नः गणितक्रमः प्रतिपेदे येन पारस्परिकसंख्यासम्बन्धजक्रियाकौशलेन पुरातनैः गणितज्ञैः सुलभतया गणितक्रियोपसंहारविधिः आविश्चक्रे। अनेन हि अद्यत्वे दृग्गणितैक्यसम्पादनाय प्रयियतिषमानाः मतिमन्तो विद्वांसः बहूपकृताः सन्ति , इत्थमेव इतोऽप्यन्ये गणितक्रमाः गणकोत्तमैः उपज्ञातव्याः इत्यलमतिविस्तरेण ।

**पादटीप्पणी**

1 सूर्यसिद्धान्तः – अ.१ श्लो.५३

2 एषः १४ शतकस्य पूर्वार्धे सूर्यसिद्धान्तस्य व्याख्यां व्यधासीत्।

व्याख्यातं भास्करीयं लघु तदनु महाभास्करीयं स भाष्यम् ।
पश्चाल्लीलावती च ग्रहगतिविषयं किंचिदन्यच्च येन ॥
सोऽयं श्रीरुद्रशिष्यो वदनजशिशवे सूर्यसिद्धान्तसंस्थम् ।
वक्षत्यस्पष्टमर्थं गणितविषयगं कर्म तत्रैव हि स्यात् ॥ इति व्याख्यारम्भवचनात् भास्करीयादिगणितग्रन्थानां व्याख्याकर्तुः अस्य गणितपटुता स्फुटति।

3 सूर्यसिद्धान्तः – विवरणव्याख्या अ.१ श्लो.५३ पृ.सं.१४

4 सूर्यसिद्धान्तः – विवरणव्याख्या अ.१ श्लो.५३ पृ.सं.१४

5 सूर्यसिद्धान्तः – विवरणव्याख्या अ.१ श्लो.५३ पृ.सं.१४

6 सूर्यसिद्धान्तः – विवरणव्याख्या अ.१ श्लो.५३ पृ.सं.१५

7 सूर्यसिद्धान्तः – विवरणव्याख्या अ.१ श्लो.५३ पृ.सं.१६

8 सूर्यसिद्धान्तः – विवरणव्याख्या अ.१ श्लो.५३ पृ.सं.१७

9. सूर्यसिद्धान्तः – श्रीतत्त्वामृतव्याख्योपेतः – चौखम्भासंस्कृतभवनम् , वाराणसी - २००६

**अनुशीलितग्रन्थः-**

**श्रीसूर्यसिद्धान्तः – परमेश्वरदैवज्ञकृतविवरणव्याख्योपेतो मातृकाग्रन्थः – G.O.M.L. Madras – Manscript No. – R-3730 (S.R-2077)**

राष्ट्रियसंस्कृतसंस्थानम.क.जे.सोमैया, विद्याविहारः, मुम्बई

 ISSN – 2349-3100

# अहिल्याबाई द्वारा निर्मित प्राचीन सोमनाथ मन्दिर

✍ डॉ.आशीष कुमार चौधरी

**सोमनाथश्च तेषां वै प्रथमः परिकीर्तितः। तन्माहात्म्यं श्रृणु मुने। प्रथमं सावधानतः।।**
**चन्द्रं च स्वामिनं प्राप्य शोभमाना विशेषतः। चन्द्रोपि चैव ताः प्राज्यः शोभते स्म निरन्तरम्।।**
**हेम्ना चैव मणिर्भिति मणिना हेम चैव हि। एवं च समये तस्य यज्जातम् श्रूयतेमिति।।**
**सर्वस्वापि च पत्नीषु रोहिणीनाम या स्मृता। यथैका सा प्रिया चासीत्तथान्या न कदाचन।।**
**सर्वास्वापि च पत्नीषु रोहिणीनाम या स्मृता।यथैका सा प्रिया चासीत्तथान्या न कदाचम।**
**अन्याश्च दुःखमापन्नः पितरं शरणं यजुः ।गत्वा तस्मै च यद्दुःखं तथा तामिर्नुवेदितम्।।**
दक्षः स च तथा श्रुत्वा......................।। [1] शिवमहापुराणम् 14/1-62

इन्दौर होल्कर वंश की महारानी अहिल्याबाई ने छहबार खण्डित हो चुके मुख्य मन्दिर के अवशेषों के कुछ अन्तर की दूरी पर नये मन्दिर का निर्माण किया। मन्दिर का शिलान्यास 1783 में हुआ और 1888 में उसकी प्राणप्रतिष्ठा हुई।[2] दो स्तर वाले मन्दिर के भूगर्भ में मुख्यलिंग की प्रतिष्ठा की गयी ताकि वह आततायियों के आक्रमण से सुरक्षित रहे। उपर के तल पर अहल्येश्वर महादेव की प्रतिष्ठा तथा गूहा में सोमनाथ महादेव की प्रतिष्ठा की गई।

**सा भगारव्या जगद्धात्री लिंग मूर्त्यस्ति वेदिका।6**
**लिङ्गस्तु भगवान् द्वाभ्यां जगत् सृष्टि द्विजोत्तमाः**
**लिङ्ग मूर्त्ति शिवो ज्योतिस्तमसश्चोपरिस्थितः॥**
**लिङ्ग वेदि समायोगदिर्द्ध नारीश्वरोऽभवत्॥[3] लिंगपुराणम् - 99/6,7,8.**

जूनागढ़ राज्य में जब नवाब का शासन था तब पूजा व मन्दिर के रखरखाव के अधिकार वड़ोदरा गायकवाड़ के हाथ में था।[4] प्राचीन सोमनाथ विस्तृत भूभाग में फैला है। परकोटे से घिरे प्रांगण में और भी कई मन्दिर है। मन्दिर घरातल से लगभग 30 फीट नीचे है ऊपरी ऊँचाई 50 फीट है। कुल मिलाकर मन्दिर 80 फीट है। मन्दिर का मण्डपव्दार 20 फीट है। 20 x 20 के मण्डप का आन्तरिक भाग सादा है मण्डप पर कलाकृतियों कम दिखाई पड़ती हैं। मण्डप का आन्तरिक भाग विस्तृत है जिस पर एक मणडप में हनुमान जी की तथा गणेश जी की प्रतीमा स्थापित की गई है। प्रतिमा अत्यन्त प्रचीन है। मण्डप प्राचीन होते हुए भी नवीनता का आभास प्रदान करता है। मण्डप से 5 x 7 फीट की सकरी गली होते हुए गर्भगृह तक पहुँचा जाता है। गर्भगृह का आन्तरिक निर्माण सफेद पत्थर से निर्मित किया गया है। गर्भगृह का वास्तु अत्यन्त रमणीय है। गर्भगृह 5 x 5 फीट का काले पत्थर का ज्योतिर्लिङ्ग विद्यमान है तथा उनकी पीठि चारों ओर 2 फीट फैली है। पीठिका चारों ओर से चाँदी से मढ़ा हुआ है। 18 x 18 फीट के गर्भगृह की आन्तरिक ऊँचाई 15 फीट है। गर्भगृह में पार्वती माता की 4 फीट की प्रतिमा है। पर्वत से उत्पन्न हुई पार्वती देवी अक्षमाला, महादेव, गणेश तथा कमण्डलु को धारण करती है ऐसी मान्यता है कि इस प्रतिमा के दोनों ओर अग्निकुण्ड की प्रतिष्ठा करनी चाहिए।[91]**अक्षसूत्रं शिवं गणाध्यक्षं कमण्डलुम्। अग्निकुण्डोभये पक्षे पार्वती पर्वतोद्भवा ॥ [5]देवतामूर्तिलक्षणाधिकाराख्ये, 8/14**

तथा लक्ष्मी माता की प्रतिमा 4 फीट की ही है। जो आशीर्वाद मुद्रा में यहाँ विद्यमान है। लक्ष्मी माता पास में ही गंगा माता तथा सरस्वती माता की प्रतिमा विद्यमान है। लक्ष्मी माता के पास में ही गंगा माता तथा सरस्वती माता की प्रतिमा विद्यमान है। सरस्वती ज्ञान एवं संस्कृति की देवी है इनके विविध नाम हैं- वाक्, वाग्देवी, वागीश्वरी, भारती, वाणी इत्यादि। मत्स्यपुराण में सरस्वती को श्वेत वस्त्रों और अलंकारों से सुसज्जित करते हुए, ब्रह्मा की ही भाँती हंसारुढ और ब्राह्मणी जैसी स्वरुप वाली, ब्रह्मा की भाँती हाथों में पुस्तक,अक्षमाला, पद्मधारण किए बनाने का निदेश है।(66/6,261/242) अग्निपुराण के अनुसार सरस्वती चतुर्भुज बनाने का निर्देश है उनके हाथ में पुस्तक अक्षमाला और दोनों हाथों में वीणा धारण किए हो।[6] (अग्नि.50/16) मन्दिर में शिवयंत्र है[7]

**द्रष्ट्वा तं कर्णिकामध्ये सद्योजातादिकान् यजेत्। दिक्षु मध्ये ततोष्टारे नन्द्यादीष्टसेवकान्।**
**नन्दी महाकाल संज्ञो गणेशो वृषभस्तथा। ततो भृङ्गीरिटिः स्कन्दउमाचण्डीश्चोष्टम्।।**

 ISSN – 2349-3100

**ततो षोडशदले द्वितीयावरणे स्थिताः। अन्तसूक्ष्मौ च शिव एकपादेकरूद्रकः।।**

ततस्त्रिमूर्तिश्रीकण्ठौ वामदेवोष्टमो मतः। जेष्ठः श्रेष्ठो रुद्रकालो........................।।

मन्त्रमहोदधिः, षोडशः, तरङ्गः, 77-86

गर्भगृह की सकरी गली होते हुए ऊपरी तल में स्थित अहिल्लेश्वर महादेव मन्दिर में जाने की व्यवस्था है। अहिल्लेश्वर महादेव मन्दिर 15 x 15 फीट का है तथा 15 फीट ही इसकी आन्तरिक ऊँचाई है। गर्भगृह में 2 फीट का शिवलिङ्ग विद्यमान है। तथा वही पार्वती माता की प्रतिमा भी स्थित है। मन्दिर का शिखर भाग गुम्बदाकार है, गम्बद का स्वरुप खिले कमल पुष्प के सदृश है। शिखर पर बन्द कलश है। तथा 7 फीट का ध्वज स्तम्भ विद्यमान है। पास में ही बन्द कलश युक्त छोटा शिखर[8] भी विद्यमान है।

**क्षीरोदार्णवके पूर्वं मध्यमाने सूरासुरैः।**

**तत्रोत्पन्न सुतिलकम् कलशः कामरूपिणम्।। कलानिधिः 9/2**

**अभिषिक्तो दिव्यघटैः फलपल्लवसंयुतैः। तत्रैव 9/4**

**प्रासादास्याष्टमांशेन पृथत्वं कलाशाण्डतके।**

**षोडशांशैर्युतं श्रेष्ठं मध्यं द्वित्रिशदतः ।। तत्रैव 9/10**

**स्कन्धे षडंशके सप्तभाग आमलसारकाः। अष्टविशंति भक्ते तु उदयः स्यात्तदर्धतः॥**

**ग्रीवाभाग त्रयं कार्यं अण्डकं च पञ्चभागिकं। त्रिभागा चन्द्रिका कार्यामलसारी तथैव च॥**

**निगमे सार्धषड्भागम् कुर्यादामलसारिकाम्। चन्द्रिका च द्विसार्धांशां अण्डकं पञ्चभागिकम्॥**

**कलानिधि 8,17-19**

**अभिशक्तो दिव्यघटैः फलपल्लवसंयुतैः। सर्वपापविनिमुक्तः श्रियं प्राप्नोति मानवः॥**

**क्षीरार्णवे समुत्पन्नं प्रासादस्याग्रजातकम्। प्रासादो देवतानां च नरेन्द्राणां च हम्यर्कम्॥**

**कलानिधि पृ. 3, 4-6**

प्रांगण में अन्य कई शिवालय विद्यमान है तथा प्रांगण में ही मुक्ताकाश में 5 फीट का शिवलिङ्ग विद्यमान है। प्रांगण में सभा इत्यादि हेतु सभा मण्डप भी विद्यमान है तथा वही होम कुण्ड भी विद्यमान है।

प्रांगण के बाहरी भाग में भी कई मन्दिर विद्यमान है।

**सन्दर्भ-सूची**

1.शिवमहापुराणम् 14/1-62

2.कुमार, मनीष; सोमनाथ दिग्दर्शन, पृ. 122

3. लिंगपुराणम् - 99/6,7,8

4 तत्रैव, पृ. 127. .

5. देवतामूर्तिलक्षणाधिकाराख्ये, 8/14

6.अग्निपुराणम्, 50/16,
अग्निपुराण(66/6,261/242 )
अग्निपुराणन-.50/16

7.मन्त्रमहोदधिः, षोडशः, तरङ्गः, 77-86

8.कलानिधिः 9/2
तत्रैव 9/4
तत्रैव 9/10
कलानिधि 8,17-19 कलानिधि पृ. 3, 4

ज्यौतिषविभाग,राष्ट्रियसंस्कृतसंस्थानम्, क.जे सोमैयासंस्कृतविद्यापीठम्, मुम्बई

 ISSN – 2349-3100

# काव्य का स्वरूप

✍किरण मिश्रा

काव्य अथवा कविता या पद्य साहित्य की वह विधा है जिसमें किसी कहानी या मनोभाव को कलात्मक रूप से किसी भाषा के द्वारा अभिव्यक्त किया जाता है। भारत में कविता का इतिहास और कविता का दर्शन बहुत पुराना है। इसका प्रारंभ भरत मुनि से समझा जा सकता है।

**"कण्ठे मेखलया नितम्बफलके तारेण हारेण वा पाणौ नुपूरबन्धनेन चरणे केयूरपाशेन वा।**
**शौर्येण प्रणते रिपौ नायन्तिके हास्यताम् औचित्येन विना रूधि प्रतनुते, नालंकृति र्नो गुणाः।। औचित्यविचारचर्चाः क्षेमन्द्र– पृ0 186**

**पर्याय-**

काव्य या कविता का शाब्दिक अर्थ है काव्यात्मक रचना या कवि की कृति, जो छन्दों की शृंखलाओं में विधिवत बांधी जाती है। काव्य वह वाक्य रचना है जिससे चित्त किसी रस या मनोवेग से पूर्ण हो। अर्थात् वह कला जिसमें चुने हुए शब्दों के द्वारा कल्पना और मनोवेगों का प्रभाव डाला जाता है। 'रसगंगाधर' में 'रमणीय' अर्थ के प्रतिपादक शब्द को 'काव्य' कहा है। 'अर्थ की रमणीयता' के अंतर्गत शब्द की रमणीयता (शब्दालंकार) भी समझकर लोग इस लक्षण को स्वीकार करते हैं। पर 'अर्थ' की 'रमणीयता' कई प्रकार की हो सकती है। इससे यह लक्षण बहुत स्पष्ट नहीं है। 'साहित्य दर्पणाकार' विश्वनाथ का लक्षण ही सबसे ठीक माना गया है। उनके अनुसार 'रसात्मक वाक्य ही काव्य है।' रस अर्थात् मनोवेगों का सुखद संचार की काव्य की आत्मा है।

1. *संक्षेपात् वाक्यमिष्टार्थव्यवच्छिन्ना, पदावली काव्यम्* **(अग्नि पुराण);**
2. *शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली* **(दंडी);**
3. *ननु शब्दार्थौ काव्यम्* **(रुद्रट);**
4. *काव्य शब्दोयं गुणलंकार संस्कृतयो: शब्दार्थयोर्वर्तते* **(वामन);**
5. *शब्दार्थशरीरं तावत् काव्यम्* **(आनन्दवर्धन);**
6. *निर्दोषं गुणवत् काव्यं अलंकारैरलंकृतं रसान्तितम्* **(भोजराज);**
7. *तददोषौ शब्दार्थौ सगुणावनलंकृती पुन: क्वापि* **(मम्मट)**
8. *गुणालंकाररीतिरससहितौ दोषरहिती शब्दार्थौ काव्यम्* **(वाग्भट);**
9. *निर्दोषा लक्षणवी सरीतिर्गुणभूषिता, सालंकाररसानेकवृत्तिर्भाक् काव्यशब्दभाक्* **(जयदेव);**
10. *काव्यं रसादिमद्वाक्यं श्रुतं सुखविशेषकृत्* **(आचार्य शौद्धोदनि);**
11. *वाक्यं रसात्मकं काव्यम्* **(विश्वनाथ);**
12. *गुणवदलङ्कृतञ्च काव्यम्* (राजशेखर)

**प्रयोजन-**

**चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि । काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते ॥ चतुर्वर्गफलप्राप्तिहि का्व्यतो "रामादिवत्प्रवर्तितव्यं न रावणादिवत्" इत्यादिः कृत्याकृत्यप्रवृत्तिनिवृत्त्युपदेशद्वारेण सुप्रतीतैव ।"**साहित्यदर्पण प्रथमपरिच्छेद

**प्राचीनता-**

काव्य या पद्य साहित्य का इतिहास लगभग कई साल पुराना है और इसका प्रारंभ तेरहवीं शताब्दी से समझा जाता है। हरभाषा की तरह हिंदी कविता भी पहले इतिवृत्तात्मक थी, यानि किसी कहानी को लय के साथ छंद में बांध कर अलंकारों से सजा कर प्रस्तुत किया जाता था। भारतीय साहित्य के सभी प्राचीन ग्रंथ कविता में ही लिखे गए हैं। इसका विशेष कारण यह

ISSN – 2349-3100

था कि लय और छंद के कारण कविता को याद कर लेना आसान था। जिस समय छापेखाने का आविष्कार नहीं हुआ था और दस्तावेज़ों की अनेक प्रतियां बनाना आसान नहीं था उस समय महत्त्वपूर्ण बातों को याद रख लेने का यह सर्वोत्तम साधन था। यही कारण है कि उस समय साहित्य के साथ साथ राजनीति, विज्ञान और आयुर्वेद को भी पद्य (कविता) में ही लिखा गया। भारत की प्राचीनतम कविताएं संस्कृत भाषा में ऋग्वेद में हैं जिनमें प्रकृति की प्रशस्ति में लिखे गए छंदों का सुंदर संकलन हैं। जीवन के अनेक अन्य विषयों को भी इन कविताओं में स्थान मिला है।

**द्वा सुवर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।तमोरन्यः पिप्पलं स्वाद्वत्ति अनशन्नयो अभिचाकशीति।।**
**यत्किंचित्काव्यबन्धेशु सादृश्येनोपमीयते।ऋग्वेद, 1–164 –20**
**सक्तुमिव तितउना पुनन्तो यत्रा धीरा मनसा वाचमक्रत। अत्रा सखायः सख्यानि जानते भद्रेषां लक्ष्मीर्निहिताधिवाचि।।ऋग्वेद,10-71-2**
**यत्किंचित्काव्यबन्धेशु सादृश्येनोपमीयते।उपमा नाम सा ज्ञेया गुणाकृतिसमाश्रया।। नाट्यशास्त्रा : भरतमुनि –16/41**

## काव्यशास्त्रीय विविध- ग्रन्थ-

भरत : नाट्यशास्त्रा (ईसा पूर्व दोसर शताब्दी)–
भामह : काव्यालंकार (सन् 500–600ई0)–
दण्डी : काव्यादर्श (छठम शताब्दी)–
उद्भट : काव्यालंकार –सार–संग्रह (800ई0)–
वामन : काव्यालंकारसूत्रा (850 ई0क पूर्व)–
रूद्रट : काव्यालंकार (800–50ई0)–
कुन्तक : वक्रोक्तिजीवित (**10** शताब्दी)–
भोजराज : सरस्वती कण्ठाभरण एवं श्रृंगारप्रकाश (सन् 1030सँ ई0)–
मम्मट : काव्यप्रकाश (1100ई0क लगभग)–
रूय्यक : अलंकार–सर्वस्व एवं अलंकार–सूत्रा (सन् 1135ई0)–
हेमचन्द्र : काव्यानुशासन (सन् 1150ई0क बाद)–
वाम्भट : वाग्भटालंकार (12म शताब्दी)–
शोभाकर मित्रा : अलंकार रत्नाकर (11 –13 शताब्दी)–
जयदेव : चन्द्रालोक (सन् 1200–1300ई0)–
विद्याधर : एकावली (सन् 1282–1327ई)–
विद्यानाथ : प्रतापरूद्र यशोभूषण (14म शताब्दी
वत्सलांछन : काव्य–परीक्षा (1380–1437वि0सं0)–
भानुदत्त : अलंकार–तिलक (14म शताब्दी)–
वाग्भट (द्वितीय) : काव्यानुशासन (1450ई0
विश्वनाथ : साहित्यदर्पण (1300–1384ई0)–
अप्पय दीक्षित : चित्रामीमांसा एवं कुवलयानन्द (सत्राहम शताब्दी)–
पण्डितराज जगन्नाथ : रसगंगाधर (17म शताब्दी)–
विश्वेश्वर पण्डित : अलंकार–कौस्तुभ, अलंकार–मुक्तावली, एवं अलंकार–प्रदीप (**18** शताब्दी)

## काव्य के प्रकार

काव्य तीन प्रकार के कहे गए हैं, ध्वनि, गुणीभूत व्यंग्य और चित्र।

- ध्वनि वह है जिसमें शब्दों से निकले हुए अर्थ (वाच्य) की अपेक्षा छिपा हुआ अभिप्राय (व्यंग्य) प्रधान हो।
- गुणीभूत व्यंग्य वह है जिसमें व्यंग्य अर्थ अगूढ़ बन जाए तो ध्वनिकाव्य नहीं रहता, गुणोभूत व्यंग्य या मध्यम काव्य वह हो जाता है।[1]
- चित्र या अलंकार वह है जिसमें बिना व्यंग्य के चमत्कार हो। इन तीनों को क्रमशः उत्तम, मध्यम, और अधम भी कहते हैं।

काव्यप्रकाशकार का जोर छिपे हुए भाव पर अधिक जान पड़ता है, रस के उद्रेक पर नहीं। काव्य दो प्रकार का माना गया है, दृश्य औरश्रव्य। दृश्य काव्य वह है जो अभिनय द्वारा दिखलाया जाय, जैसे, नाटक, प्रहसन आदि। जो पढ़ने और सुनने योग्य हो, वह श्रव्य है। श्रव्य काव्य दो प्रकार का होता है, गद्य और पद्य। पद्य काव्य के महाकाव्य और खंडकाव्य दो भेद कहे जा चुके

हैं। गद्य काव्य के भी दो भेद किए गए हैं। कथा और आख्यायिका। चंपू, विरुद और कारंभक तीन प्रकार के काव्य और माने गए है।**''अंगीकरोति यः काव्यं शब्दार्थावनलंकृती। असौ न मन्यते कस्मादनुष्णमनलंकृती।'** जयदेव : चन्द्रलोक – 1/2
**''जदपि सुजाति सुलच्छनी सुबरन सरिस सुवित्त। भूषण बिनु न राजई कविता वनिता मित्त।।** चन्द्रलोक, पेज नं0 74

**पद्य काव्य के भेद**
**काव्य के दो भेद किए गए हैं-**
**1.महाकाव्य**
महाकाव्य सर्गबद्ध और उसका नायक कोई देवता, राजा या धीरोदात्त गुंण संपन्न क्षत्रिय होना चाहिए। उसमें शृंगार, वीर या शांत रसों में से कोई रसप्रधान होना चाहिए। बीच बीच में करुणा; हास्य इत्यादि और रस तथा और और लोगों के प्रसंग भी आने चाहिए। कम से कम आठ सर्ग होने चाहिए। महाकाव्य में संध्या, सूर्य, चंद्र, रात्रि, प्रभात, मृगया, पर्वत, वन, ऋतु सागर, संयोग, विप्रलंभ, मुनि, पुर, यज्ञ, रणप्रयाण, विवाह आदि का यथास्थान सन्निवेश होना चाहिए।
**2.खंड काव्य**
खण्ड काव्य में मुख्य चरित्र की किसी एक प्रमुख विशेषता का चित्रण होने के कारण अधिक विविधता और विस्तार नहीं होता। मुक्तक काव्य में कथा-सूत्र आवश्यक नहीं है। इसलिए उसमें घटना और चरित्र के अनिवार्य प्रसंग में भाव-योजना नहीं होती। वह किसी भाव-विशेष को आधार बना कर की गई स्वतंत्र रचना है। हिंदी साहित्य में खंडकाव्य प्रबंध काव्य का एक रूप है।
**शैली के अनुसार काव्य के भेद-** शैली के अनुसार काव्य के तीन भेद हैं-

1. पद्य काव्य- इसमें किसी कथा का वर्णन काव्य में किया जाता है, जैसे जयशंकर प्रसाद का कामायनी ।
2. गद्य काव्य- इसमें किसी कथा का वर्णन गद्य में किया जाता है, जैसे रवींद्रनाथ टैगोर की गीतांजलि। गद्य में काव्य रचना करने के लिए कवि को छंद शास्त्र के नियमों से स्वच्छंदता प्राप्त होती है।
3. चंपू काव्य- इसमें गद्य और पद्य दोनों का समावेश होता है। मैथिलीशरण गुप्त की 'यशोधरा' चंपू काव्य है।

**सन्दर्भ-सूची**

1.औचित्यविचारचर्चाः क्षेमन्द्र– पृ0 186
2. नाट्यशास्त्रा - **राधावल्लभ त्रिपाठी, भूमिकाखण्ड**
3 ऋग्वेद, 1–164 –20
4 ऋग्वेद, 10 –71–2
5 नाट्यशास्त्रा : भरतमुनि –16/41
6चन्द्रलोक : , ले0 डॉ0 श्री कृष्णमणि त्रिपाठी , प्र0 चौखम्बा सुरभारती , संस्करण 2010 , पेज नं0 74
**7 संस्कृत साहित्य का इतिहास- बलदेव उपाध्याय,भूमिकाखण्ड**
8.मैथिली साहित्यक इतिहास– ले॰ डॉ॰ दुर्गानाथ झा 'श्रीश' (प्रथम संस्करणक प्रथम भागक पृ॰–6)
9.अलंकार–दर्पण, ले0–पं0 सीताराम झा, प्र0–शेखर, पृ॰–19
10.आधुनिक मैथिली कवितामे निहित स्वर–प्रो॰ प्रेमशंकर सिंह (मिथिला दर्शन, मार्च–अपैल, 1972, पृ॰ 19)
11.त्रिकुशा, ले०–पं०–काशीकान्त मिश्र 'मधुप', प्र०–नवरत्न ग्रंथमाला; संवत् 2024, पृ० 1–2

**गवेषिका, मै.वि ,ल.ना. मि.वि दरभंगा।**

ISSN – 2349-3100

# Swami Vivekananda and His Contribution to the Making of Modern India

✍Dr. Shweta Sood

In numerous ways, the life and works of Swami Vivekananda (1863-1902) mark the historical development of India rediscovering herself in modern times. An attempt has been made in this paper to critically reflect on his life and legacy. A great soul born in the 19th century, a patriotic saint who touched and influenced the hearts of millions bestowed his noble contribution not only to India but to the larger world. This great son of our Bharat Mata has influenced each and every person to a great extent. His charismatic character left such an indelible impact that he is still revered as a youth icon and his birthday is celebrated as the National Youth Day.

Generally speaking, Swamiji was not only a visionary or a monk but a nationalist and a reformer par excellence. His knowledge of India was based on his first-hand experience acquired during his visits throughout the country. These visits, named reverently as pilgrimages, transformed his vision and touched him to the core of his heart. He became a true lover of humanity and devoted himself to the welfare of all beings. His contribution to India and to the larger world is difficult to sum up in words. Swami Vivekananda vehemently emphasized that our lives would become more significant and meaningful when we follow the path of spirituality. He strongly advocated the need of spirituality in our lives. In spirituality, he envisioned and delivered India's message to herself and to the world. He propounded that self-realization done on the basis of spirituality helps the people to realize their true potential. Especially in the colonizing period of 19th century India, this was tantamount to men and women when they felt a need and made effort to discover greater self-confidence in them. In this regard, we can see, his views are of paramount importance: "To believe blindly is to denigrate the human soul. Be an atheist if you want, but do not believe in anything unquestioningly." He opined desire, ignorance and inequality as the trinity of bondage in life.

Swamiji rejected political praxis as well as social and religious reforms inspired by the West. He defined in clear terms that the objective of his life is to strengthen and support the lives of Indian people. He believed that gentleness and goodness are the roots of humanity. His essential message was the empowerment of people through education, collective thought and action but above all, realizing the underlying unity of all human existence. His contribution in shaping India's attitude towards other countries became transparent before everyone when he participated in the World Parliament of Religions held in Chicago in 1893. The keynote of his address was on universal brotherhood, acceptance and tolerance. His speech was devoid of theology, dogmatism or religious rigidities and was highly applauded as the most unique speech delivered by any delegate present in the conference. It contained a universal theme which left an indelible impression on everyone. Through his speech he gave a clear message to both Indians and foreign audiences that though India may not be militarily as powerful as other countries (since she was not politically free at that time); it had a special role in creating a world based on moral values. He claimed that Indian culture is so deep rooted and enriched that it will show path to the rest of the world. When he came back to India, people all over were jubilant and rose as one man to welcome, because he had brought honour and glory to their country. Swamiji had gone on to exhort his audience in his later lectures, to aspire to the greater virtue of acceptance of all religions rather than be content with the virtue of merely tolerating others. At Madras he delivered five lectures and issued a clarion call to his country to rise and discard lethargy: "Arise my countrymen! You have slept for long. Discard this slavish mentality and work hard to recapture the lost glory, the name and fame that was India." He tried to awaken the patriotic fervour in the hearts of his dear countrymen saying: "We must go out; we must conquer the world through our spirituality and philosophy. There is no other alternative, we must do it or die. The only condition of national life, of awakened and vigorous national life, is the conquest of the world by Indian thought." Even before Vivekananda, abstemious detachment from the world has been criticized in the Hindu mythology, but it was he who first actively joined and propagated the idea of individual renunciation to committed social service. In this sense, he gave a new meaning or significance to the very idea and institution of *sanyas*. The Ramakrishna Math and Mission today, is an active embodiment of this legacy.

 ISSN – 2349-3100

Vivekananda's heart was filled with pure compassionate feelings of love for the socially marginalized and oppressed. His own poverty made him realize the pitiful condition of his countrymen and he felt an intense sympathy for the needy and afflicted. He understood from his Guru that true religion transcends all barriers of caste, colour and creed, because the same divine spark resides in all. God is immanent and transcends all such petty divisions. Applying the Vedantic notion of the cosmic Braham from which everything emerges and into which all dissolve, without any distinction, Vivekananda called upon each person to accept the other. That is understanding the principle of life – that each is either divine or as flawed as the other. He opined: "So long as millions live in hunger and ignorance, I hold every person a traitor who, having been educated at their expense, pays not the least heed to them." He raised a powerful voice for the upliftment of the poor and the downtrodden people of India saying, "Feel, my children, feel; feel for the poor, the ignorant, the downtrodden." It is he, who even before Gandhiji, saw the image of God residing in the lowly and the poor *(daridranarayan)* and his heart consistently exhibited the love for his dear countrymen. Vivekananda's notion of God as the infinite self inspires us all to tap into our dormant selves, wherein lies the infinite capacity to become good and compassionate. He believed that the rejection of the other stems from our own fears and insecurities, and his clarion call was for all to awaken from this hypnotic, weak state. Vivekananda anticipates Gandhiji in yet another important aspect and that is his prioritizing social amelioration to political work. He opined: "National prosperity is another name for death and degradation to millions of other races." Like Mahatma Gandhi again, he first thoroughly acquainted himself with the people of India before launching any schemes of social or political work. Through this he hoped to be aware of pressing contemporary problems, to strengthen a promising nationhood and to reinstate to man, his inherent dignity, poise and self-confidence.

'Man-making' was Vivekananda's first mission. With his untiring spirit he ignited a spark in the hearts of millions not only in India but in the world. He believed that we work best when we work for others. His encouraging ideas always inspired the people to follow the path of selfless service. He reflects: "Perfection does not come from belief or faith. Talk does not count for anything. Parrots can do that. Perfection comes through selfless work." One of the greatest contributions of Swamiji towards the making of modern India is his concept of education. To him education plays a vital role in the welfare of society and it is critical in shaping the future of human beings. His valuable thoughts on the subjects of education are very much relevant even today. He defines: "Education is the manifestation of the perfect divinity already in man." He explains: "Education is not the amount of information that is put into your brain and runs riots there, undigested, all your life. We must have life-building, man-making, character-making assimilation of ideas." This definitely has valuable relevance in modern day society. Swamiji's progressive vision projects an invariable need to take the important step towards bringing education, enlightenment and progress to the common man. He discerns that the movement has to originate in the common people and benefit their lives. He always emphasized that reforms should be made at the grass-root level and not in agendas of which the common man have little or no understanding. He found that his countrymen were poor, famished and in chains and he gave ringing calls, "Arise, awake and stop not till the goal is reached."

Swamiji's inherent desire was to bring back India's pride of place in the assembly of nations, as a civilization which, weaves the human beings together in the thread of love, respect, benevolence, commonness and unity. He viewed: "Worship of society and popular opinions is idolatry. The soul has no sex, no country, no place, no time." Like his guru, Sri Ramakrishna Paramahamsa, he thought mutual kindness, benevolence and compassion between man and man was more important than that coming from a distant God. He believed: "As soon as you make a sect, you protest against universal brotherhood." Like his I*shta* Buddha, he was so readily empathetic and compassionate towards his fellowmen. He gave a clarion call to his countrymen in these glowing words: "The highest truth is this. God is present in all beings. They are His multiple forms. There is no other God to see. It is man-making religion that we want...Give up these weakening mysticisms and be strong. For the next fifty years, let all other Gods disappear from our minds. This is the only God that is awake...Our own race, everywhere His hands, everywhere His feet, everywhere His eyes. He covers everything...The first of all worships is the worship of those all around us. He alone

serves God, who serves all other beings.” Vivekananda took patriotism out of its political confines and vested it with larger possibilities and meaning. Similarly, he viewed religion not to be some personal feeling or idiosyncrasy but that which was socially committed and responsible. He saw the entire universe as a manifestation of the absolute One. He realised that there is only one Self in the universe, only one existence. When we see all life in the universe in this perspective, the selfish, narrow-minded outlook and compartmentalisation instantly collapse. He stood for harmony of religions and divinity of humankind. He said that each soul is potentially divine, omnipotent and omniscient, awaiting manifestation. The aim of life is to realise the same through selfless service to humanity, assimilation of wisdom through deep introspection or devotion to divinity. He emphasized that external rituals of religions are of secondary importance but their spiritual essence needs to be accepted. He said, “We want to lead mankind to the place where there is neither Vedas, nor Bible, nor Quran; yet this has to be done by harmonising all three. We need to learn that religions are but varied expressions of The Religion, which is Oneness, so that each may choose a path that suits him best.” This vision of a universal religion concerns no particular cult but signifies culmination of wisdom.

To sum up, Vivekananda gave a great contribution to the making of modern India. He strove to promote peace and human brotherhood on the spiritual foundation of the Vedanta oneness of existence. Selfless service of man was for him the desirable path for Self- realization. He lived the fact that it’s never too early to begin to understand and comprehend the spirit. His message to the youth was not in what he said, but in how he lived, and the age at which he lived it. In his tiny span of life, he set up an example that wisdom is not necessarily the preserve of ripe old age. He used his youth, the only time he had in life, to study and master life and death – which makes him the definitive youth icon, one who practised his philosophy in his youth, not just preached to the youth. Freedom for him was really a larger concept; it had more to do with the freeing of the mind than the body. The essential divinity and thereby unity of all creatures has to be realized through unconditional love for all, wise detachment and extension of self through service of humanity beyond the dogmas and any sectarian faith. This universalism par excellence or way of life engulfing the whole gamut of existence must evolve as the religion or spirituality of posterity as panacea for all the world problems of the day. Swamiji pinned his faith in individuals, not institutions and hence chose a path that was quiet, indirect, and organic. Let us ponder what he says about himself: “My name should not be made prominent. It is my ideas that I want to see realized. The disciples of all the prophets have always inextricably mixed up the ideas of the Master with person, and at last killed the ideas for the person.” He became aware of his approaching end and he wrote to Miss Macdonald, “My boat is nearing the calm harbour from where it is never more to be driven out.” The Light that had shown and illumined not only India, but many other parts of the world also, was extinguished on 4$^{th}$ May 1902. Though this was not correct for Swamiji had once said in London: “It may be that I shall find it good to get outside of my body – to cast it off like a disused garment. But I shall not cease to work! I shall inspire men everywhere, until the world shall know that it is one with God.” It is very much true that the blazing fervour of a Vivekananda, a spiritual billionaire, comes but once in a lifetime. The more enduring aspects of his life and work have inspired many and will keep on inspiring and motivating coming generations in the days to come.

## Works Cited

Nikhilananda, Swami. *Vivekananda: A Biography.* Kolkata: Advaita Ashrama, 2010. Print.
Sankar. *The Monk as Man: The Unknown Life of Swami Vivekananda.* New Delhi: Penguin, 2011. Print.
Sharma, Ganesh Dutt. *Vivekanandacharitamrtam*. New Delhi: Amity UP, 2004. Print.
Sholapurkar, G.R. *Saints and Sages of India.* Delhi: Bharatiya Vidya Prakashan, 1992. Print.
Tapasyananda, Swami. *Letters of Swami Vivekananda.* Kolkata: Advaita Ashrama, 2002. Print.
Vivekananda, Swami. *The Complete Works of Swami Vivekananda.* 8Vols. Kolkata: Advaita Ashrama, 1947. Print.
---. *The Philosophical and Religious Lectures of Swami Vivekananda*. Kolkata: Advaita Ashrama, 1995. Print.

**Assistant ProfessorDepartment of English**
**K.J.Somaiya Sanskrit Vidyapeetham, Vidyavihar, Mumbai-400077.**